महेभबृंहितानि ॥२९॥ शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधूजनसेवितानां

किरा०
२९

॥ जज्ञे निवेशनविभागपरिस्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानां ॥ ४० ॥ इति श्री किरात
र्जुनीये महाकाव्ये सुरांगनागमनो नाम सप्तमः सर्गः ॥ ॥ अथ स्वमायाकृतमंदिरोज्वलं ज्वल
न्मणिव्योमसदां सनातनं ॥ सुरांगना गोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥ य
थायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः ॥ वनं विशंत्यो वनजायतेक्षणाः क्ष
णद्युतीनां दधुरेकरूपतां ॥ २ ॥ निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तनिर्ह्रादिविभूषणारवः ॥ नितं
बिनीनां भृशमादधे धृतिं नभःप्रयाणादवनौ परिक्रमः ॥ ३ ॥ घनानि कामं कुसुमानि बिभ्रतः क
रप्रचेयान्यपहाय शाखिनः ॥ पुरोभिसस्रे सुरसुंदरीजनैर्यथोत्तरेच्छा हि गुणेषु कामिनः ॥
४ ॥ तनूरलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमंजरीभृतः ॥ विलासिनीबाहुलतावन

राम
२९

नाल्पयोर्विलेपनामोदहृताः शिखिर्विरे ॥५॥ निपीयमानस्तवकाः शिलीमुखैरशोकयष्टिश्चलवा
लपल्लवा ॥ विडंबयंती दद्दृशे वधूजनैरमंददष्टोष्ठकरावधूननं ॥६॥ करौधुनानानवपल्लवाकृती वृ
था भामिनिमा परिश्रमं उपेयुषीकल्पलताभिशंकया कथंचित्तस्त्रस्यति षट्पदावलिः ॥७॥ जहीहि
कोपं दयितोऽनुगम्यतां पुरोऽनुशेते तव चंचलं मनः ॥ इति प्रियं कांचिदुपैतुमिच्छतीं पुरोऽनुनिन्ये निपु
णः सखीजनः ॥८॥ युगं समुन्नतैः काशदुकूलशालिभिः परिष्कृताः सुन्दरसपंक्तिमेखलैः प्रती
रहे शैः स्वकलत्रचारुभिर्विभूषिताः कुंजसमुद्रयोषितः ॥९॥ विदूरपातेन भिदामुपेयुषः च्युताः
प्रवाहादभितः प्रसारिणः ॥ प्रियांकशीताः शुचिमौक्तिकत्विषो वनप्रहासा इव वारिबिंदवः ॥१०
॥ सखीजने प्रेममुरुकृतादरं निरीक्ष्यमाणा इव नम्रमूर्तयः ॥ स्थिरद्विरेफांजनसारितोदरैर्वि

काशिभिः पुष्पविलोचनैर्लताः ॥११॥ उपेयुषीणां बृहतीरधित्यका मनांसि जह्रुः सुरराजयोषितां ॥ कपो
लकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्चंदनाः ॥१२॥ चक्षुर्भिः कुलकं ॥ स्वगोचरे सत्यपि
चित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनां ॥ नभश्चराणामुपकर्तुमिच्छतां प्रियाणि चक्रुः प्र
णयेन योषितः ॥१३॥ उपक्षतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लंभिता ॥ न किंचिदू
चे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवं ॥१४॥ प्रिये परा यच्छति वाचमुन्मुखी निब
द्धदृष्टिः शिथिलाकुलोच्चयां समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवं ॥१५॥ स
लीलमासक्तलतान्तभूषणं समासजंत्या कुसुमावतंसकं ॥ स्तनोपपीडं नुनुदे नितंबिना
घनेन कश्चिज्जघनेन कांतया ॥१६॥ कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिने

रसा॥ वलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता॥१७॥ विलंबमानाकुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया। तदुप्रसूनाच्यपदि श्य सादरं मनोक्षिनाथस्य मनः समाहृदे॥१८॥ युग्मं॥ व्यपोहितुं लोचनतो मुखानिलैरपारयंतं किल पुष्पजं रजः॥ पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी॥१९॥ इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे॥ विहाय निःसारतयेव भूरुहः पदं वनश्रीर्वनितासु संदधे॥२०॥ प्रवालभंगारुणपाणिपल्लवः परागपांडूकृतपीवरस्तनः॥ महीरुहः पुष्पसुगंधिराददे वपुर्गुणोच्छ्रायमिवांगनाजनः॥२१॥ वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः॥ समेपियानुं चरणाननीश्वरान्मदादिवाप्रस्खलतः पदे पदे॥२२॥ विसारिकांचीमणिर

किरा
३१

३१

बु ५

स्मिलब्धया मनोहरोच्छ्राय नितंबशोभया ॥ स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघना
नि गौरवैः ॥ २३ ॥ समुच्छ्वसत्पंकजकोशकोमलैरुपाहितश्रीण्युपनीविनाभिभिः ॥ दधंति मध्येषु व
लीविभंगिषु स्तनातिभारादुदराणि नम्रतां ॥ २४ ॥ समानकांतीनि तुषारभूषणैः सरोरुहैरस्फु
टपत्रपंक्तिभिः ॥ चितानि घर्मांबुकणैः समंततो मुखान्यनुत्फुल्लविलोचनानि च ॥ २५ ॥ विनिर्यती
नां परिखेदमंथरं सुरांगनानामुपसानुवर्त्मनः ॥ स विस्मयं रूपयतो नभश्चराद्विवेश तत्पूर्व
मिवेक्षणादरः ॥ २६ ॥ कुलकं ॥ अथ स्फुरन्मीनविधूतपंकजा विपंकतीरस्खलितोर्मिसंहतिः
॥ पयोवगाहुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥ २७ ॥ प्रशांतघर्माभिभवः श
नैर्विवान्विलासिनीभ्यः परिमृष्टपंकजः ॥ ददौ भुजालंबमिवात्तशीकरस्तरंगमालांतर(

राम
३१

रगोचरोनिलः ॥२३॥ गतैः सहावैः कलहंसविभ्रमं कलत्रभारैः पुलिनं नितंबिभिः ॥ मुखैः सरोजानि
च दीर्घलोचनैः सुरस्त्रियः साम्यगुणान्निरासिरे ॥२४॥ विभिन्नपर्यस्तगमीनपंक्तयः पुरोवगाढाः स
खिभिर्मरुत्वतः कथंचिदापः सुरसुंदरीजनैर्विबाधिभिस्तत्प्रथमं प्रपेदिरे ॥२५॥ विगाढमात्रे रमणी
भिरंभसि प्रयत्नसंभावितपीवरोरुभिः ॥ विभिद्यमाना विससार सारसाँनुदस्य तीरेषुरंगसंहतिः ॥
२६॥ शिलाघनैर्नाकसदामुरस्थलैर्बृहन्निवेशैश्च वधूपयोधरैः ॥ तटांतनीतेन विभिन्नवीचि
ना रुषेव भेजे कलुषत्वमंभसा ॥२७॥ विधूतकेशाः परिलोलितस्रजः सुरांगनानां प्रविलुप्त
चंदनाः ॥ अतिप्रसंगाद्विहितागसो मुहुः प्रकंपमीयुः सभया इवोर्मयः ॥२८॥ विपक्षचित्तोन्म
थना नखव्रणास्तिरोहिता विभ्रममंडनेन ये ॥ हतस्य शेषानिव कुंकुमस्य तांविकत्थनीया

त ४

ष्टबुरन्यथा स्त्रियः॥२९॥प्रियेण संग्रथ्य विपक्षसन्निधावुपाहितां वक्षसि पीवरस्तने॥स्रजं न
काचिद्विजहौ जलाविलां वसंति हि प्रेम्णि गुणा न वस्तुनि॥३०॥असंशयं न्यस्तमुपांतरक्ततां
यदेव रोद्धुं रमणीभिरंजनं॥हृतेपि तस्मिन्सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियं॥३१॥द्यु
तिं वहंतो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः॥उपप्लुतास्तत्क्षणशोचनीयतां
च्युताधिकाराः सचिवा इवाययुः॥३२॥विपत्रलेखा निरलक्तकाधरा निरंजनाक्षीरपि बिभ्रतीः
श्रियः॥निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मंडनं॥३३॥तथा न पूर्वं कृतभूषणा
दरः प्रियानुरागेण विलासिनीजनः॥यथा जलार्द्रो नखमंडनश्रिया ददाह दृष्टीः प्रतिपक्ष
योषितां॥३४॥शुभाननाः सांबुरुहेषु भीरवो विलोलहाराश्चलफेनपंक्तिषु॥नितांतगौ

येष्वलक्तकं कुंकुमेष्वलं नलेभिरे ताः परभागमूर्मिषु ॥४०॥ कृतं भसिव्यस्तवधूकराहतेरवं मृदंगध्वनि
धीरमुज्झति ॥ मुहुः स्तनैस्तालसमं समाहतैर्मनोरमं नृत्यमिव प्रवेपितं ॥४१॥ श्रियाहसद्भिः कम
लानि सस्मितैरलंकृतांबुः प्रतिमागतैर्मुखैः ॥ कृतानुकूल्या सुरराजयोषितां प्रसादसाफल्यमवा
प जाह्नवी ॥४२॥ परिस्फुरन्मीनविघट्टितोरवः सुरांगनास्त्रासविलोलदृष्टयः ॥ उपाययुः कंपितपाणि
पल्लवाः सखीजनस्यापि विलोकनीयतां ॥४३॥ भयादिवाश्लिष्य झषाहतेंभसि प्रियं मुदानंदयति स्म
मानिनी ॥ अकृत्रिमं रसाहितैर्मनोहरं तिरामाः कृतकैरपीहितैः ॥४४॥ तिरोहितांतानि नितांतमा
॥ कुलैरपां विगाहादलकैः प्रसारिभिः ॥ ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृंदांतरितैः सरोरु
हैः ॥४५॥ सरोजपत्रे परिलीनषट्पदे विशाललदृष्टेः स्विदमू विलोचने ॥ शिरोरुहाः स्विन्नतपक्ष्मसंह

प्रेमरु

किरा०
३३

नेर्ह्रिरेफहृद्दंनु निशॅ [illegible] निस्तुलं ॥४६॥ अगूढहासस्फुटदंतकेसरं मुखं स्विदेतद्विकचं नु पंक(
जं इति प्रलीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः ॥४७॥ युग्मं करौ धुनाना नवपल्ल
वाकृती पयस्यगाधे किल जातसंभ्रमा ॥ सखीषु निर्वाच्यमधार्ष्ट्यदूषितं प्रियांगसंश्लेषमवापमा
निनी ॥४८॥ प्रियैः सलीलं करवारिवारितः प्रवृद्धनिश्वासविकंपिताधरः ॥ सविभ्रमाधूतकराग्र(
पल्लवो यथार्थतामाप विलासिनीजनः ॥४९॥ उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवा
रिवारितं ॥ मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे ॥५०॥ विहस्य पाणौ विधृ(
ते धृतांभसि प्रियेण वध्वा मदनार्द्रचेतसः ॥ सखीव कांची पयसा घनीकृता बभार वीतोच्चय प(
वंधमंशुकं ॥५१॥ निरंजने साचि विलोकितं दृशावपावकं वेपथुरोष्ठपल्लवं ॥ नतभ्रुवो मंडय

राम
३३

त्तिस्मविग्रहे वलिक्रियाचातिलकं तदास्पदं ॥ ५२ ॥ प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तु
तोषसांत्वनैः ॥ जनस्य रूढप्रणयस्य चेतसः किमप्यमर्षोनुनये भृशायते ॥ ५३ ॥ निमीलदाकेकरलो
लचक्षुषां प्रियोपकंठं कृतगात्रवेपथुः । निमज्जतीनां श्वसितोद्धतस्तनः श्रमोनुनासां मदनोनु पप्रथे
॥ ५४ ॥ इत्थंविलसत्वनिताभिरुह्यमानं पीनस्तनोरुजघनस्थलशालिनीभिः ॥ उत्संगितोर्मिवय
लंघितनीरदेशामौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥ ५५ ॥ तीरांतरेषु मिथुनानि रथांगनाम्नां नीत्वा
विलोलितसरोजवनश्रियस्ताः ॥ संरेजिरे सुरसरिज्जलधौतहारास्ताराविताननतरला इव यामव
त्यः ॥ ५६ ॥ संक्रांतचंदनरसाहितवर्णभेदं विच्छिन्नभूषणमणिप्रकरांशुचित्रं बद्धोर्मिनाकवनिता
परिभुक्तमुक्तं सिंधोर्बभार सलिलं शयनीयलक्ष्मीं ॥ ५७ ॥ इति किरातार्जुनीये महाकाव्ये सुरपुष्प

ति विहारो नाम अष्टमः सर्गः ॥ वीक्ष्य रंतुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः ॥ तत्प्रियार्थमिव या
यातुमथास्तं भानुमानुपपयोधि ललंबे ॥१॥ मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि
भानौ द्यौरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीं ॥२॥ अंशुपाणिभिरवीतपिपासः प
द्मजं मधु भृशं रसयित्वा ॥ क्षीवतामिव गतः क्षितिमेष्यन्लोहितं वपुरुवाह पतंगः ॥३॥ गम्यता
मुपगते नयनानां लोहितायति सहस्रमरीचौ ॥ आससाद विरहय्य धरित्रीं चक्रवाकमिथुनान्य
भितापः ॥४॥ कांतदूत्य इव कुंकुमताम्राः सायमंडनमभित्वरयंत्यः ॥ सादरं ददृशिरे दयिताभिः
सौधजालपतिता रविभासः ॥५॥ मुक्तमूललघुरुज्झितपूर्वः पश्चिमे नभसि संभृतसांद्रः ॥ सा
मि मज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥६॥ अग्रसानुषु नितांतपिशंगैर्भू

घरान्मृडकरैरवलंब्य ॥ अस्तशैलगहनानि विवस्वानाविवेश जलधिं नु महीं नु ॥ ७ ॥ आकु
लमूल्पमतत्रिकुलानामारवैरत्तुदितोषसरागः ॥ आययावहरिदश्वविपांडुस्तुल्यतां दिनमुखे
न दिनांतः ॥ ८ ॥ आस्थितः स्थगितवारिदपंक्त्या संध्यया गगनपश्चिमभागः ॥ सोर्मिविद्रुमवितान
विभासां रंजितस्य जलधेः श्रियमूहे ॥ ९ ॥ प्रांजलावपि जनेनतमूर्द्धि प्रेमतत्परवणे वनिताहि त्वा
संध्ययानुविदधे विरमंत्याचापलेन सुजनेन रमेत्री ॥ १० ॥ औषसातपभयादपलीनं वासरच्छवि
विरामपटीयः ॥ सन्निपत्य शनकैरिव निम्नादंधकारमुदवापसमानि ॥ ११ ॥ एकतामिव गत
स्य विवेकः कस्यचिन्न महतो प्युपलेभे ॥ भास्वता निदधिरे भुवनानामात्मनीवपतितेन विशेषाः ॥ १२ ॥
इच्छतां सह वधूभिरभेदं यामिनी विरहिणां विहगानां ॥ आपुरेव मिथुनानि वियोगं लंघ्यते न खलु का

किरा०
३५
३४

लनियोगः ॥१३॥ यच्छति प्रतिमुखं दयितायै वाचमंतिकगतेपि शशांके ॥ नीयते स्म नतिमुज्झितहर्षं पंकजं
मुखमिवांबुरुहिण्या ॥१४॥ रंजिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ॥ पूरिता नु विषमेषु
धरित्री संहृता नु ककुभस्तिमिरेण ॥१५॥ रात्रिरागमलिनानि विकाशं पंकजानि रहयंति विहाय ॥ स्प
ष्टतारकमियाय नभः श्रीर्वस्तुमिच्छति निरापदि सर्वः ॥१६॥ व्यानशे शशधरेण विमुक्तः केतकीकुसु
मकेसरपांडुः ॥ चूर्णमुष्टिरिव लंभितकांतिर्वासवस्य दिशमंशुसमूहः ॥१७॥ उज्जहती शुचमिवाशु त
मिस्रामंतिकं व्रजति तारकराजे ॥ दिक्प्रसादगुणमंडनमूहे रश्मिहाससविशदं मुखमैंद्री ॥१८॥ नी
लनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः ॥ खे रराज निपतत्करजालं वारिधेः पयसि गांग
मिवांभः ॥१९॥ द्यां निरुंधदतिनीलघनाभं ध्वांतमुद्यतकरेण पुरस्तात् ॥ क्षिप्यमाणमसितेतरभा

राम
३५

साशंभुनेवकरिचर्म्मचकासे ॥२०॥ अंतिकांतिकगतेंदुविसृष्टे जिह्मतां जहति दीधितिजाले ॥ निःसृत
स्तिमिरभारनिरोधादुच्छ्वसन्निवरराजदिगंतः ॥२१॥ लेखया विमलविद्रुमभासा संहितं तिमिरमिंदुरुदासे ॥
दंष्ट्रया कनकभंगपिशंगया मंडलं भुव इवादिवराहः ॥२२॥ दीपयन्नथ नभः किरणौघैः कुंकुमारुणपयोध
रगौरः ॥ हेमकुंभ इव पूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः ॥२३॥ नप्रसादसुचितं गमिता द्यौर्नोद्धृतं ति
मिरमद्रिवनेभ्यः ॥ दिङ्मुखेषु च न धाम विकीर्णं भूषिता च रजनी हिमभासा ॥२४॥ उद्गतेंदुमविभिन्नतमि
स्रां पश्यति स्म रजनीमवितृप्तः ॥ व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः ॥२५॥ मानि
नीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन् ॥ मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शी
तमयूखः ॥२६॥ श्लिष्यतः प्रियवधूरुपकंठं तारकास्ततकरस्पहिमांशोः ॥ उद्धमन्नभिरराजसमंतादंगराग

किरा०
३६
36

इव लोहितरागः ॥२७॥ प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि ॥ क्षीरसिंधुरिव मंदरभिन्नः काननान्यविरलोच्चतरूणि ॥२८॥ शारतां गमितया शशिपादैः छायया विटपिनां प्रतिपेदे ॥ न्यस्तशुक्लबलिचित्रतलाभिः स्तुल्यता वसतिवेश्ममहीभिः ॥२९॥ आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन ॥ सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यं ॥३०॥ गंधमुद्धतरजःकणवाही विक्षिपन्विकसतां कुमुद्वतां ॥ आदुधाव परिलीनविहंगा यामिनीमरुदपां वनराजीः ॥३१॥ संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः ॥ यामिनीवनितया ततचिह्नः सोत्पलो रजतकुंभ इवेन्दुः ॥३२॥ ओजसापि खलु नूनमनूनं सत्सहायमुपयाति जयश्रीः ॥ यद्विभुः शशिमयूखसखः सन्नाददे विजयिचापमनंगः ॥३३॥ सद्मनां विरचनाहितशोभैरागतप्रियकथैरपि दूत्यां ॥ सन्निकृष्टरतिभिः सुरदारैर्भूषितैरपि विभूषणमीषे

राम
३६

॥३४॥ नस्वजोरुरुचिरे रमणीभ्यः स्वहृदनानि विरहे मदिरावा॥ साधनेषु हि रनेरूपधत्ते रम्यतां श्रियसमाग
म एव ॥३५॥ प्रस्थिताभिरभिनाथनिवासं लंघित प्रियसखीवचनाभिः॥ मानिनीभिरपहस्तितधैर्यैः सादय
न्नपि मदो वललंबे ॥३६॥ कांतवेश्मबहु संदिशतीभिर्यातमेव रतये रमणीभिः॥ मन्मथेन परिलुप्तमतीनां
प्रायशः स्वलितमप्युपकारि ॥३७॥ आशु कांतमभिसारितवत्या योषितः पुलकरुद्धकपोलं॥ निर्जिगा
य मुखमिंदुमखंडं खंडपत्रतिलकाकृति कांत्या ॥३८॥ उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि
साध्वी॥ आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः॥३९॥ किं गतेन न न हि युक्तमुपैतुं कः प्रि
ये सुभगमानिनि मानः॥ योषितामिति कथासु समेतैः कामिभिर्बहुरसा धृति रूहे॥४०॥ युग्मं योषि
तः पुलकरोधि दधत्या घर्मवारि नवसंगमजन्म॥ कांतवक्षसि बभूव पतंत्या भूषितं लुलितमंडनमेव॥

॥४१॥ द्वारि चक्षुरधिपाणि कपोलो जीवितं त्वयि कुतः कलहोऽस्याः ॥ कामिनामिति वचः पुनरुक्तं प्रीतये
नवनवत्वमियाय ॥४२॥ साचिलोचनयुगं नमयंती रुंधती दयितवक्षसि पातं ॥ सुभ्रुवो जनयति स्म विभूषां
संगतावुपरराम च लज्जा ॥४३॥ सीधुपानविधुरासु निगृह्णन्मानमाशु शिथिलीकृतलज्जः ॥ संगतासु
दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ॥४४॥ सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन ॥
योषितः सुहृदिव स्म रुणद्धि प्राणनाथमभिवाष्पनिपातः ॥४५॥ शंकितायकृतवाष्पनिपातामीर्ष्यया
विमुखितां दयिताय ॥ मानिनीमभिमुखस्थितचित्तां शंसति स्म घनरोमविभेदः ॥४६॥ लोलदृष्टिवदनं दयि
तायाः चुंबति प्रियतमे रभसेन ॥ व्रीडया सह विनीविनितं वा दंशुकं शिथिलतामुपपेदे ॥४७॥ ह्रीतया
गलितनीवि निरस्यन्नंतरीयमवलंबितकांचि ॥ मंडलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥४८

॥४८॥ आहतानखपदैः परिरंभाश्चुंबनानि घनदंतनिपातैः ॥ सोकुमार्यगुणसंभृतकीर्त्तिर्वाम एव सुरतेष्वपि का
मः ॥४९॥ पातुमाहितरतीन्यभिलेषुस्तर्षयंत्यपुनरुक्तरसानि ॥ सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि
युवानः ॥५०॥ पानिपल्लवविधूननमंतः सीत्कृतानि नयनार्द्धनिमेषाः ॥ योषितां रहसि गद्गदवाचामस्त्रता
मुपययुर्मदनस्य ॥५१॥ कांतसंगमपराजितमन्यौ वारुणीरसनसांतविवादे ॥ मानिनीजनउपाहितसंधौ स
न्दधे धनुषि नेषुमनंगः ॥५२॥ कुप्यताशु भवतानतचित्ताः कोपितांश्च वरिवस्यत यूनः ॥ इत्यनेकउपदेशइ
वस्म स्वाद्यत युवतिभिर्मधुवारः ॥५३॥ भर्तृभिः प्रणयसंभ्रमदत्तां वारुणीमतिरसां रसयित्वा ॥ ह्रीविमोहवि
रहादुपलेभे पाटवं नु हृदयं नु वधूभिः ॥५४॥ स्वादितः स्वयमथैधितमानं लंभितः प्रियतमैः सह पीतः ॥
आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥५५॥ भ्रूविलाससुभगाननुकर्त्तुं विभ्रमानिव

वधूनयनानां ॥ आरदेहमृदुविलोलपलाशैरुत्पलैश्चषकवीचिषु कंपः ॥ पक्ष्मलीष्टपल्लवविदंशरुचीनां
हृद्यतामुपययौ रमणानां ॥ फुल्ललोचनविनीलसरोजैरंगनास्यचषकैर्मधुवारः ॥५७॥ प्राप्यते गुण
वतापि गुणानां व्यक्तमाश्रयवशेन विशेषः ॥ तत्तथा हि दयिताननदत्तं व्यानशे मधु रसातिशयेन ॥५८॥
वीक्ष्य रत्नचषकेष्वतिरिक्तां कांतदंतपदमंडनलक्ष्मीं ॥ जज्ञिरे बहुमताः प्रमदानामोष्ठयावकनुदो मधु
वाराः ॥५९॥ लोचनाधररुचा हृतरागा वासिताननविशेषितगंधा ॥ वारुणी परगुणात्मगुणानां
व्यत्ययं विनिमयं नु वितेने ॥६०॥ तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा ॥ यो
षितः सुहृदिव प्रविभेजे लंभितेक्षणरुचिर्मदरागः ॥६१॥ क्षीणयावकरसोप्यतिपानैः कांतदंतप
दलंभितशोभः ॥ आययावतितरामिव वध्वाः सान्द्रतामधरपल्लवरागः ॥६२॥ रागकांतनयनेषु

नितांतंविद्रुमारुणकपोलतलेषु॥सर्वगापिहृदयेशवनितानांदर्पणोष्ठिवसुखेषुमदश्रीः॥६९॥वद्ध
कोपविकृतैरपिरामास्वादृताभिमततामुपनिन्ये॥वश्यतांमधुमदोदयितानामात्मवर्गहितमिच्छति
सर्वः॥७०॥वाससांशिथिलतामुपनाभिह्रीनिरासमपदेकुपितानि।योषितांविदधतीगुणपक्षे
निर्ममार्जमदिरावचनीयं॥७१॥भर्तृरूपसखिनिक्षिपतीनामात्मनःस्फुटमदोषमितानां।व्रीड
याविफलयावनितानांनस्थितंनविगतंहृदयेभ्यः॥७२॥रुंधतीनयनवाक्यविकासंसादितोभय
करापरिरंभे।व्रीडितस्यललितंयुवतीनांक्षीवतावहुगुणैरनुजह्रे॥७३॥योषिदुद्धतमनोभवरा
गामानवत्यपिययोरहपितांकं॥कारयत्यनिभृतागुणदोषैर्वारुणीखलुरहस्यविभेदं॥७४॥आ
हितेनुमधुनामधुरत्वेचेष्टितस्यगमितेनुविकासं॥आवभौनवइवोद्धतरागःकामिनीष्ववसरः

किरा०
३९
39

कुसुमेषोः॥ ७५॥ मागमन्मह विमूढधियो नः शोकमुरंतुमिति शंकितनाथाः॥ योषितो नमहिरं भृशमीषुः प्रेम पश्यति भयान्यपदेपि॥ ७६॥ चिन्तनिर्हतिविधायिविविक्तं मन्मथोमधुमदः शशिभासः संगमश्च दयितैः स्म नयंति प्रेमकाममपि भुवं प्रमदानां॥ ७७॥ धार्ष्यलंघितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये मानिनी रतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप॥ ७८॥ सीधुपानविधुरेषु वधूनां निघ्नतामुपगतेषु वपुष्षु॥ ईहितं रतिरसाहितभावं वीतलज्जमपि कामिषु रेजे॥ ७९॥ अन्योन्यरक्तमनसामथ विभ्रतीनां चित्तोद्भुवः सुरसखाप्सरसां निदेशं॥ वैबोधिकध्वनिविभावितपश्चिमार्द्धा सा संहृतेव परिवृत्तिमियाय रात्रिः॥ ८०॥ निद्राविनोदितनितांतरतिक्लमानामायामिमंगलनिनादविबोधितानां॥ रा

राम
३९

मास्तुभाविविरहाकुलितास्तुपूर्वतांनपूर्वत्तामिवसमाहधिरेरतानि ॥ ८१ ॥ कांताजनंसुरत
खेदनिमीलिताक्षंसंवाहितुंसमुपयातिवमन्दमन्दं ॥ हर्म्येषुमाल्यमदिरापरिभोगगंधाना
विष्काररजनीपरिवृत्तिवायुः ॥ ८२ ॥ आमोदवासितचलाधरपल्लवेषुनिद्राकषायितविपा
टललोचनेषु ॥ व्यामृष्टपत्रतिलकेषुविलासिनीनांशोभांबबंधवदनेषुमदस्यशेषः ॥ ८३
गतवतिनखलेखालक्ष्यतामंगरागेसमददयितपीताताम्रबिंबाधरोष्ठाः ॥ विरहविधुरमि
ष्टासत्सखीवांगनायात्हृदयमवललंबेरात्रिसंभोगलक्ष्मीः ॥ ८४ ॥ इति श्रीकिराता
र्जुनीये महाकाव्ये लक्ष्मके भारविकृतौ नवमः सर्गः ॥ ॥ अथपारमलजामवाप्य

किरा०
४०
40

प्पलक्ष्मीमवयवदीपितमंडनश्रियस्ताः वसतिमभिविहायरम्यहावाः सुरपतिसूनुविलोभ
नायजग्मुः ॥ १ ॥ द्युतपथमभियातुमिछतीनांगगनपरिक्रमलाघवेनतासां ॥ अवनिषुचरणैः
पृथुस्तनीनामलघुनितंबतयाचितंनिषेदे ॥ २ ॥ निहितसरसयावकैर्बभासेचरणतलैःकृत
पद्धतिर्वधूनां ॥ अविरलवितनेवशक्रगोपैररुणितनीलतृणोलपाधरित्री ॥ ३ ॥ ध्वनिरग
विवरेषुनूपुराणांपृथुरसनागुणसिंजितानुयातः ॥ प्रतिरववितनोवनानिचक्रेमुखर
रसमुत्सुकहंससारसानि ॥ ४ ॥ अवचयपरिभोगवंतिहिंस्रैःसहचरितान्यमृगाणिकान
नानि ॥ अभिदधुरभितामुनिंवधूभ्यःसमुदितसाध्वसविक्लवं चचेतः ॥ ५ ॥ नृपतिमुनिप

राम
४०

स्र२

रियहेणासाभूःस्वरसविवा[ ]रसंजहारतेजः॥ उपहितपरमप्रभावधाम्नांनहिजयिनांत

पसामलंघ्यमस्ति॥ ६ ॥सचकितमिवविस्मयाकुलाभिःशुचिसिकतास्ववतिमानुषाणि

ताभिः॥ क्षितिषुददृशिरेपदानिजिष्णोरुपहितकेतुरथांगलांछनानि॥ ७ ॥अतिशयि

तवनान्तरद्युतीनांफलकुसुमावचयेऽपितद्विधानां॥ ऋतुरिवतरुवीरुधांसमृध्यायुवतिजनैर्जग

हेमुनिरप्रभावः॥ ८ ॥मृदितकिशलयःसुरांगनानांससलिलवल्कलभारभुग्नशाखः॥ बहुमतिमधि

कांययावशोकःपरिजनतापिगुणायसद्गुणानां॥ ९ ॥यमनियमकृशीकृतस्थिरांगःपरिददृशेवि

धृतायुधःसताभिः॥ अनुपमशमदीप्ततागरीयान्कृतपदपंक्तिरथर्वणेववेदः॥ १० ॥स्वरसरितिपरंत

योधिगच्छन्विधृतपिशंगबृहज्जटाकलापः॥ हवि॥ रिवविततःशिखासमूहैःसमभिलषन्नुपवेदिजात

वेषः ॥११॥ शशधर इव लोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः ॥ शिखरनिचयमेकसानुस
द्मा सकलमिवापि दधन्महीधरस्य ॥१२॥ सदृशमतनुमाकृतेः प्रयत्नं तदनुगुणां च परैः क्रियामलंघ्यां
दधदलघुतपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिं ॥१३॥ चिरनियमकृशोऽपि शैलसारः श
मनिरतोऽपि दुरासदः प्रकृत्या ॥ ससचिव इव निर्जनेऽपि तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभ
र्तुः ॥१४॥ कुलकं तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयंत्यः ॥ अवययुरम
रस्त्रियोऽस्य यत्नं विजयफले विफलं तपोऽधिकारे ॥१५॥ मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबला
न्यधितिष्ठतस्तपांसि ॥ अलघुनि बहु मेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगं ॥१६॥ अथ
कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन ॥ प्रसभमवततार चित्तजन्मा हरतिम

नोमधुराहियौवनश्रीः॥१७॥सपदिहरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदंगैः॥युगपदृतु
गणस्यसन्निधानंवियतिवनेचयथायथंवितेने॥१८॥सजलजलधरंनभोविरेजेविवृतिमियायरु
चिस्तडिल्लतानां॥व्यवहितरतिविग्रहैर्वितेनेजलगुरुभिस्तनितैर्दिगंतरेषु॥१९॥परिसुरपतिसू
नुधामसद्यःसमुपदधन्मुकुलानिमालतीनां॥विरलमपजहारबद्धबिंदुःसरजसतामवनेरपांनिपा
तः॥२०॥प्रतिदिशमनुगच्छताभिमृष्टककुभविकासमसुगंधिनानिलेन॥नवइवविवभौसचित्तज
न्मागतधृतिराकुलितश्चजीवलोकः॥२१॥व्यथितमपिभृशंमनोहरंतीपरिणतजंबुफलोपभो
गहृष्टा॥परभृतयुवतिःस्वनंवितेनेनवनवपोषितकंठरागरम्यं॥२२॥अभिभवतिमनःकदंबवा
योमदमधुरेचशिखंडिनांनिनादे।जनइवनधृतेश्चचालजिष्णुर्नहिमहतांसुकरःसमाधिभंगः॥२३

ष्टतविसवलयावलिर्वहंती कुमुदवनैकदुकूलमात्तवाणा ॥ शरदमलतले सरोजपाणौ घनसमये
नवधूरिवाललंवे ॥ २४ ॥ समदशिखिरुतानि हंसनादैः कुसुमदवनानि कदंवपुष्पवृष्ट्या ॥ ॥ श्रियमतिश
यनीं समेत्य जग्मुर्गुणमहतां महते गुणाय योगः ॥ २५ ॥ सरजसमपहाय केतकीनां प्रसवमुपांति
कनीपरेणुकीर्णं ॥ प्रियमधुरसनानि षट्पदाली मलिनयति स्म विनीलवंधनानि ॥ २६ ॥ मुकुलि
तमतिशय्य वंधुजीवं धृतजलविंदुषु शाड्वलस्थलीषु ॥ अविरलवपुषः सुरेंद्रगोपा विकचपला
शवनश्रियं समीयुः ॥ २७ ॥ अविरलफलिनीवनप्रसूनः कुसुमितकुंदसुगंधिगंधवाहः ॥ गुण
मसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः ॥ २८ ॥ निचयिनि लवलीलताविकासे (
विहधतिरोध्रसमीरणोचहर्षं ॥ विकृतिमुपययौ न पांडुसूनुश्चलति नयान्न जिगीषतां हि चेतः ॥

तु२
॥२९॥ कतिपयसहकारपुष्परम्यस्तनुतुहिनोल्पविनिद्रसिंधुवारः॥ सुरभिमुखहिमागमांतशंसी
समुपययौ शिशिरः स्मरैकबंधु॥३०॥ कुसुममतजुवनान्युपैतुकामा किशलयिनीमवलंब्य चूतय
ष्टिं॥ क्वणदलिकुलनूपुरं निरासे नलिनवनेषु पदं वसंतलक्ष्मीः॥३१॥ विकसितकुसुमाधरं हसंती
कुरबकराजिवधूं विलोकयंतं ददृशुरिव सुरांगना निषण्णं सशरमनंगमशोकपल्लवेषु॥३२॥ मु
सनवलितपल्लवाधरोष्ठे नवविहितेक्षिमिवावधूनयंती॥ मधुसुरभिनिषद्देन पुष्पमुखइवशाल
लतावधूश्चुचुंबे॥३३॥ मुहुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन॥ अलिकुलमल
काकृतिं प्रपेदे नलिनमुखांतविसर्पि पंकजिन्याः॥३४॥ प्रभवति न तदा परो विजेतुं भवति जितेंद्रि
यता यदात्मरक्षा॥ अवजितभुवनस्तथाहि लेभे सितनुरगे विजयं न पुष्पमासः॥३५॥ कथमिव तव

किरा०
४२
43

सम्मतिर्भवित्रीसममृतुभिर्मुनिनावधीरितस्मं इतिविरचितमल्लिकाविकासःस्मयतइवस्ममधुंनि
दाघकालः ॥३६॥ बलवदपिबलंमिथोविरोधिप्रभवतिनैवविपक्षनिर्जयाय ॥ भुवनपरिभवीनय
त्तदानींतमृतुगणः क्षणमुन्मनीचकार ॥३७॥ श्रुतिसुखमुपवीणितंसहायैरविरललांछनहा
रिणश्चकालाः ॥ अविहितहरिसूनुविक्रियास्त्रिदशवधूषुमनोभुवंवितेनुः ॥३८॥ नददलतिनिचु
येतथोत्पलानांनचविषमच्छदकुंदयूथिकासु ॥ अभिरतिमुपलेभिरेयथासांहरितनपावयवे
षुभोचनानि ॥३९॥ मुनिमभिमुखतांनिनीषवोयाःसमुपययुःकमनीयतागुणेन ॥ मदनमुपद
धेसएवतासांदुरधिगमाहिगतिःप्रयोजनानां ॥४०॥ प्रकृतमभिससारनाभिनेयंप्रविकसदंगु
लिपानिपल्लवंवा ॥ प्रथममुपहितंविलासिचक्षुःसितनुरगेनचचालनर्तकीनां ॥४१॥ अभिनय

राम
४२

मनसःस्मरांगनायानिहितमलक्तकवर्त्तनाभिताम्रं॥चरणमभिपपातषट्पदालीधृतनवलो(

हितपंकजाभिशंका॥४१॥अविरलमलसेषुनर्त्तकीनांद्रुतपरिषिक्तमलक्तकंपदेषु॥सवथुष

मिवचित्तरागमूढ्ढंनमितशिखानिकरंवकेसराणि॥४३॥नृपसुतमभितःसमन्मथायाःपरिजन(

गात्रतिरोहितांगजचेष्टः॥स्फुटमभिलषितंवभूववध्वावदतिहिसंवृतिरेवकामितानि॥४४॥अभिमु(

निसहसाहृतेपरस्मादूनमरुताजघनांशुकैकदेशे॥चकितमवसनोरुसत्रपायाःप्रतियुवतीरपि(

विस्मयंनिनाय॥४५॥धृतविसवलयेनिधायपाणौमुखमवधूषितपांडुगंडलेखं॥नृपसुतमपरा(

स्मराभितापादमधुमदालसलोचनंनिदध्यौ॥४६॥सखिदयितमिहानयेतिसामांप्रहितवतीकु

सुमेषुणाभितप्ता॥हृदयमहृदयाननामपूर्वंभवदुपकंठमुपागतंविवेद॥४७॥चिरमपिकलि

तान्यपारयंत्यापरिगदितुंपरिशुष्यतामुखेन॥ गतघृणमभितानिसत्त्वरीणांनयनयुगैःसम
माईतांमनांसि॥४८॥ अचकमतसपल्लवांधरित्रींमृदुसुरभिंविरहय्यपुष्पशय्यां॥ भृशमरतिम
वाप्यतत्रचास्याःस्तवकसुखशीतमुपैतुमंकमिच्छा॥४९॥ तदनद्युतनुरस्तुसासकामाद्व्रजतिपु
राहिपरास्तुतांत्वदृश्ये पुनरपिसुलभंतपोनुरागीयुवतिजनःखलुनाप्यतेनुरूपः॥५०॥ ज
हिहिकठिनतांप्रयच्छवाचंननुकरुणामृदुमानसंमुनीनां उपनतमवधीरयंत्यभव्याःसनि
पुणमेत्यकयाचिदेवमूचे॥५१॥ कुलकं॥ सललितवलितत्रिकाभिरामाशिरसिजसंयमना
कुलैकपाणिः॥ सुरपतितनयेपराणिरासेमनसिजजैत्रशरंविलोचनार्द्धं॥५२॥ कुसुमित
मवलंब्यचूतमुच्चैस्तनुरिभकुंभपृथुस्तनानतांगी॥ तदभिमुखमनंगचापयष्टिर्विसृतगुणे

वसमुन्ननामकाचिन् ॥ ५३ ॥ सरभससमवलंब्यनीलमन्याविगलितनीविविलोलमंतरीयं ॥ अ-
भिपतितुमनाः ससाध्वसेवच्युतरसनागुणसंयत्तावतस्थे ॥ ५४ । यदि मनसि शमः किमंग चापं
शठ विषयास्तव वल्लभा न मुक्तिः ॥ भवतु दिशति नान्यकामिनीभ्यः स्तव हृदये सुरावकाशं ॥ ॥
५५ ॥ इति विषमितचक्षुषाभिधायस्फुरदधरोष्ठमसूयया कयाचिन् ॥ अगणितगुरुमानलज-
यासस्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ ५६ युग्मं ॥ सवि[illegible]यमपराभिसृत्य साचिस्मितसुभगैकल-
सत्कपोललक्ष्मीः ॥ श्रवणनियमितेन तं निदध्यौ सकलमिवासकलेन लोचनेन ॥ ५७ ॥ करुण-
ममिहितं त्रपानिरस्तात दभिमुखं च विमुक्तमश्रुताभिः ॥ प्रकुपितमभिसारणेऽनुनेतुं प्रियमिय
नीत्य वेलाजनस्यभूमिः ॥ ५८ । असकलनयनेक्षितानिलज्जागतमलसं परिपांडुताविषाहः ॥ इ

त्तिविविधमियायतास्सुरूषां॥प्रभवतिमंडयितुंवधूरनंगः॥५९॥ अलसपदमनोरमप्रकृत्या॥
जितकलहंसवधूगतिप्रयातं॥ स्थितमुरुजघनस्तनातिभाराडुदितपरिश्रमजिह्मितेक्ष
णंवा॥६०॥ भृशकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोभिलाषः अधिकविततलो
चनंवधूनामयुगपदुन्नमितभ्रुवीक्षितेच॥६१॥ रुचिकरमपिनार्थवद्बभूवस्तिमितसमा
धिशुचौपृथातनूजे॥ ज्वलयतिमहतांमनांस्यमर्षेनहिलभतेवसरंसुखाभिलाषः॥६२
॥ विशेषकं॥ स्वयंसंराध्येवंशतमखमखंडेनतपरोछित्यालभ्यामभिषतिलक्ष्मींहरि
सुतेमनोभिःसावेगैःप्रणयविहतिध्वस्तरुचयःसगंधर्वाधामत्रिदशवनिताःस्वंप्रतिययुः
॥६३॥ इतिकिरातार्जुनीयेमहाकाव्येलक्ष्मांकेभारविकृतौअर्जुनविलोभनोनाम

नुस्त्पेएकस्तुर

दशमःसर्गः ॥ अथामर्षान्निसर्गाच्च जितेन्द्रियनयान्वया ॥ आजगा माश्रमं जिष्णोः प्रतीतःपाकशासनः ॥ १ ॥ मुनिरूपोनादहृदशेपुरः ॥ द्राघीयसा वयोतीतःपरिश्रान्तः किलाध्वना ॥ २ ॥ जरठानां कीर्णायाकेशैःसहन्यापरितःसितैः ॥ एकयेन्दुकरैरङ्कःपर्यन्त इव संध्यया ॥ ३ ॥ विशदभ्रूयुगच्छन्नवलितापाङ्गलोचनः ॥ प्रालेयावततिम्लानपलाशाब्ज इव ह्रदः ॥ ४ ॥ आसक्तभरनीकाशैरङ्गैःपरिकृशैरपि ॥ आघूनःसद्गृहिण्येव प्रायोयष्ट्यावलम्बितः ॥ ५ ॥ गूढोपि वपुषा राजन्धाम्नालोकाभिभाविना ॥ अंशुमानिवतन्वभ्रमण्डलच्छन्नमण्डलः ॥ ६ ॥ कुलकं ॥ जरतीमपि बिभ्राणःस्तनुमप्राकृताकृतिः ॥ चकाराक्रान्तलक्ष्मीकंससाध्वसमिवाश्रमं ॥ ७ ॥ अभितस्तंपृथासूनुःस्नेहेन परितस्तरे ॥ अविज्ञातेपि बन्धौ हि बलात्प्रह्लादते मनः ॥ ८ ॥ आतिथेयीं समासाद्य सुतादपचितिं हरिः ॥ विश्रम्य विष्टरे नाम व्याजहारेति भारतीं ॥ ९ ॥ त्वया साधु समारम्भि नवे वयसि यत्तपः

नु० ४

ह्रियते विषयैः प्रायो वर्षीयानपि मादृशः ॥१०॥ श्रेयसीं तव संप्राप्ता गुणसंपदमाकृतिः ॥ सुलभा रम्य
ता लोके दुर्लभं हि गुणार्जनं ॥११॥ शरदंबुधरछायागत्वर्यो यौवनश्रियः ॥ आपातरम्या विषयाः पर्यंतप
रितापिनः ॥१२॥ अंतकः पर्यवस्थाता जन्मिनः संततापदः ॥ इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥१३॥
युग्मं ॥ चित्तवानसि कल्याणी यत्त्वां मतिरुपस्थिता ॥ विरुद्धः केवलं वेषः संदेहयति मे मनः ॥१४॥ युयु
त्सुनेव कवचं ॥ किमामुक्तमिदं त्वया ॥ तपस्विनो हि वसने केवलाजिनवल्कले ॥१५॥ प्रपित्सोः किं च ते
मुक्तिं निस्पृहस्य कलेवरे ॥ महेषुधी धनुर्भीमं भूतानामनभिद्रुहः ॥१६॥ भयंकरः प्राणभृतां मृत्योर्भु
ज इवापरः ॥ असिस्तव तपस्थस्य न समर्थयते शमं ॥१७॥ युग्मं जयमत्र भवान्नूनमरातिष्वभिला
षुकः ॥ क्रोधलक्ष्म क्षमावंतः क्वायुधं क्व तपोधनाः ॥१८॥ यः करोति वधोदर्का निश्रेयसकरीः क्रि

याः ॥ ज्ञानिदोषच्छिद्रः स्वस्थाः समूढं पंकयत्पपः ॥ १९ ॥ मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः ॥ तौ
हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ ॥ २० ॥ अभिद्रोहेण भूतानामर्जयन्गत्वरीः श्रियः ॥ उदन्वानिव सिंधूना
मापदामेति पात्रतां ॥ २१ ॥ या गम्याः सत्सहायानां यासु खेदो भयं यतः ॥ तासां किं यन्न दुःखाय विपदामिव
संपदां ॥ २२ ॥ दुरासदानरीनुग्रान्धृतेर्विश्वासजन्मनः ॥ भोगान्भोगानिवाहेयानध्यास्यापन्न दुर्लभा ॥ २३
॥ नांतरज्ञाः श्रियो यानु प्रियैरासान्न भूयते ॥ आसक्तास्तास्त्वमी मूढा वामशीला हि जंतवः ॥ २४ ॥ कोऽयं वादः
स्तुतिपदे यद्दुःशीलेषु चंचलाः ॥ साधुवृत्तानपि क्षुद्रा विक्षिपंत्येव संपदः ॥ २५ ॥ कृतवानन्यदेहेषु कर्ता च
विधुरं मनः ॥ प्रियैरिव संयोगो विप्रयोगः प्रियैः सह ॥ २६ ॥ शून्यमाकीर्णतामेति तुल्यं व्यसनमुत्सवैः ॥
विप्रलंभोऽपि लाभाय सति प्रियसमागमे ॥ २७ ॥ तदारम्याण्यरम्याणि प्रियाः शल्यं तदासवः ॥ तदेकाकी

स४

श्री २

किरा०
५७
57

स वंधुः स्याद्दिष्टेन रहितो यद्दा ॥२५॥ युक्तः प्रमाद्यसि हितादपेतः परितप्यसे । यदि नेष्टात्मनः पीडा मा सं-
ज्ञि भवता जने ॥२६॥ चतुर्भिः कलापकं ॥ जन्मिनोस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलां । भवान्मा स्म
वधीन्न्याय्यं न्यायाधारा हि साधवः ॥२७॥ विजहीहि रणोत्साहं मा तपः साधु नीनशः । उच्छेदं जन्मनः कर्तुम् ए-
धि शांतस्तपोधनः ॥२८॥ जीयंतां दुर्जया देहे रिपवश्चक्षुरादयः । जितेषु ननु लोकोयं तेषु कृत्स्नस्त्वया
जितः ॥२९॥ परवानर्थसंसिद्धौ नीचवृत्तिरपत्रपः । अविधेयेंद्रियः पुंसां गौरिवैति विधेयतां ॥३०॥ श्वस्त्व-
या सुखसंवित्तिः स्मरणीयाधुनातनी । इति स्वप्नोपमान्मत्वा कामान्मा गास्तदंगतां ॥३१॥ श्रद्धेया
विप्रलब्धारः प्रिया विप्रियकारिणः । सुदुस्त्यजास्त्यजंतोपि कामाः कष्टा हि शत्रवः ॥३२॥ विविक्तेस्मि-
न्नगे भूयः प्लाविते जह्नुकन्यया । प्रत्यासीदति मुक्तिस्त्वां पुरा मा भूरुदायुधः ॥३३॥ व्याहृत्य मरुतां प-

राम
५७

त्याविति वाचमवस्थिते ॥ वचः प्रसन्नगंभीरमथो वाच कपिध्वजः ॥ ३४ ॥ प्रसादरम्यमोजस्विगरीयोलाघ-
वान्वितं ॥ साकांक्षमनुपस्कारं विष्वग्गति निराकुलं ॥ ३५ ॥ न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमं ॥ अप्र-
कंपतयान्येषामाम्नायवचनोपमं ३६ अलंघ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितं ॥ औदार्यादर्थसंपत्तेः शां-
तं चित्तमृषेरिव ॥ ३७ ॥ इदमीदृग्गुणोदेशल[illegible]ब्धावसरसाधनं ॥ व्याकुर्यात्कः प्रियं वाक्यं यो वक्ता नी-
दृगाशयः ॥ ३८ ॥ चतुर्भिः कालापके ॥ न ज्ञातं तात यत्नस्य पौर्वापर्यममुष्य मे। शासितुं येन मां धर्ममुनि-
भिस्तुल्यमिच्छसि ॥ ३९ ॥ अविज्ञातप्रबंधस्य वचो वाचस्पतेरपि व्रजत्यफलतामेव नयद्रुह इवेहितं ॥ ४० ॥
॥ श्रेयसोप्यस्य ते तात वचसो नास्मि भाजनं ॥ नभसः स्फुरतारस्य रात्रेरिव विपर्ययः ॥ ४१ ॥ क्षत्रियस्तन-
यः पांडोरहं पार्थो धनंजयः ॥ स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥ ४२ ॥ कृष्णद्वैपायनादेशाद्वि-

मर्मच्छिद्गतमीदृशं ॥ भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥ ४३ ॥ दुरक्षैर्दीव्यता राज्ञा राज्यमात्मा वयं वधूः
॥ नीतानि पणतां नूनमीदृशी भवितव्यता ॥ ४४ ॥ तेनानुजसहायेन द्रौपद्या च मया विना ॥ भृशमायामि
यामासु यामिनीष्वभितप्यते ॥ ४५ ॥ हृतोत्तरीयान्प्रसभं सभायामागतह्रियः ॥ मर्मच्छिदा नो वचसा निर
तक्षन्नरातयः ॥ ४६ ॥ उपाधत्त सपत्नेषु कृष्णाया गुरुसन्निधौ ॥ भावमानयने सत्याः सत्यंकारमिवान्त(
कः ॥ ४७ ॥ तामैक्षन्त क्षणं सभ्या दुःशासनपुरःसरां ॥ अभिसायार्कमावृत्तां छायामिव महातरोः ॥ ४८ ॥
अयथार्थक्रियारंभैः पतिभिः किं तवेक्षितैः ॥ अरुध्येतामितीवास्या नयने बाष्पवारिणा ॥ ४९ ॥ सो
ढवानसि दशामेतां व्यापार्थेनेव गुणप्रियः ॥ सुलभो हि द्विषां भंगो दुर्लभा सत्स्ववाच्यता ॥ ५० ॥ स्थित्य
तिक्रान्तिभीरूणि स्वच्छान्यकलितानि च ॥ तोयानि तोयराशीनां मनांसि च मनस्विनां ॥ ५१ ॥ धार्त्तरा

ड्ढः सहप्रीतिवैरमस्मास्वसूयति ॥ असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥ ५२ ॥ अपवादादभीतस्य समस्य
गुणदोषयोः ॥ असद्वृत्तेरहोवृत्तं दुर्विभाव्यं विधेरिव ॥ ५३ ॥ ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः यद्यमर्षः प्र
तीकारभुजालंवं न लंभयेत् ॥ ५४ ॥ अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तितां ॥ अन्योन्यस्यापि जिह्रीमः किं पुनः
सहवासिनां ॥ शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ॥ जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥
५६ ॥ अलंघ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृतः ॥ प्रियतां ज्यायसीं मा गान्महतां केन तुंगता ॥ ५७ ॥ तावदाश्री
यते लक्ष्म्या तावदस्य स्थिरं यशः ॥ पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥ ५८ ॥ स पुमानर्थवज्जन्मा य
स्य नाम्नि पुरःस्थिते ॥ नान्यमंगुलिमभ्येति संख्यायामुद्यतांगुलिः ॥ ५९ ॥ दुरासदवनज्यायान्गम्यस्तुं
गोपि भूधरः ॥ न जहाति महौजस्कं मानप्रांशुमलंघ्यता ॥ ६० ॥ गुरून्कुर्वंति ये वंश्यानन्वर्था तैर्वसुंधरा

र्वीयेरर

येषां यशांसि शुभ्राणि ह्रेपयंतींदुमंडलं ॥ ६१ ॥ उदाहरणमाशीःषु प्रथमे ते मनस्विनां ॥ शुष्काशनिरि
वामर्षो रातिषूपात्यते ॥ ६२ ॥ न सुखं प्रार्थये नार्थं उदन्वद्वीचिचंचलं ॥ नानित्यताशनेस्त्रस्यन्विविक्तं ब्र
ह्मणः पदं ॥ ६३ ॥ प्रमार्ष्टुमयशःपंकमिच्छेयं छद्मनागतं ॥ वैधव्यतापितारातिवनितालोचनांबुभिः
॥ ६४ ॥ अवहस्येथवा सद्भिः प्रमादो वास्तु मे धियः ॥ अस्थानविहितायासः कामं जिह्रेतु वा भवान् ॥
६५ ॥ वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषां ॥ निर्वाणमपि मन्येहमंतरायं जयश्रियः ॥ ६६ ॥ श्रुगं
॥ अजन्मा पुरुषस्तावद्गतासुस्तृणमेव वा ॥ यावन्नेषुभिरादत्ते विलुप्तमभिर्यशः ॥ ६७ ॥ अतिजी
येन द्विषतां यस्यामर्षः प्रशाम्यति ॥ पुरुषोक्तिः कथं तस्मिन्ब्रूहि त्वं हि तपोधन ॥ ६८ ॥ कृतं पुरुषशब्दे
न जातिमात्रावलंबिना योंगीकृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः ॥ ६९ ॥ असमानमिवौजांसि सदसा

मा१ रि३

गौरवोद्दितं ॥ नामयस्याभिनंदंति द्विषोपि स पुमान पुमान् ॥ ७० ॥ पुंगं य यथाञ्जति ज्ञं द्विषतां पु
धि प्रति चिकीर्षया ॥ मामेवाक्षेत्तिन्न पतितं तृष्यन्निव जलांजलिं ॥ ७१ ॥ स वंशस्याच्चहतस्य शशांकस्येव
लांछनं ॥ रूढो पुत्र्यर्थयापयत्र भूयते भ[illegible]र्तु राज्ञया ॥ ७२ ॥ कथं वादीयतामवींकृ मुनिनाधर्मरोधिनी ॥ आ
श्रमाद्वक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः ॥ ७३ ॥ स्वधर्ममनुरुध्यंते नातिक्रममरातिभिः ॥ पलायंते कृतध्वंसा
नाहवान्मानशालिनः ॥ ७४ ॥ आसक्ता धूरियं रूढ जननी दूरगापि मे ॥ तिरस्करोति स्वातंत्र्यं ज्यायांश्चा
चारवान्नृपः ॥ ७५ ॥ विच्छिन्नाभ्रविलायं वा विलीयेन नगमूर्द्धनि ॥ आराध्य वा सहस्राक्षमयशः शल्यमुद्धरे
॥ ७६ ॥ इत्युक्तवंतं परिरभ्य दोर्भ्यां तनूजमाविःकृतदिव्यमूर्तिः ॥ अघोविधाते मघवा विभूत्यै तस्मै भवार
धनमादिदेशः ॥ ७७ ॥ प्रीते पिनाकिनि मया सह भूमिपालैर्लोकत्रयेपि विहिताप्रतिवार्यवीर्यः ॥ ल

ह्मीसमुत्त्वकथितासिमृशंपरेषामुद्धार्यवाचमितितेनतिरोवभूवे॥७८॥ इति श्रीकिराताऽर्जुनीये म
हाकाव्ये भारविकृतौ लक्ष्मांके द्वागमनो नाम एकादश सर्ग॥ अथवासवस्यवचनेनरुचिरवदन
स्त्रिलोचनं॥ क्लांतिरहितमभिराधयितुंविधिवत्तपांसिविदधेधनंजयः॥१॥ अभिरश्मिमालिविमल
स्यधृतजयधृतेरनाशुषः॥ तस्यभुविबहुतिथास्तिथयःप्रतिजग्मुरेकचरणंनिषेदुषः॥२॥ वपुरिं
द्रियोपतपनेषुसततमसुखेषुपांडवं॥ व्यापनगपतिमिवस्थिरतामहतांहिधैर्यमविचिंत्यवैभवं॥३॥
नपपातसंनिहितपक्तिसुरभिषुफलेषुमानसं॥ तस्यशुचिनिशिशिरेचपयस्यमृतायतेहिसुत
पःसुकर्मणां॥४॥ नविसिस्मियेनविषसादमुहुरलसतांनचाददे॥ सत्वमुरुधृतिरजस्तमसीन
हतस्मतस्यहतशक्तिपेलवं॥५॥ तपसाकृशंवपुरुवाहसविजितजगत्रयोदयं। त्रासजननमपितत्व

विहंनतदस्तियन्नसुकरंमनस्विभिः ॥ ६ ॥ ज्वलतोनलादनुनिशीथमधिकरुचिरंभसांनिधेः ॥ धैर्यगु
णमवजयन्विजयीददृशेसमुन्नततरःसशैलतः ॥ ७ ॥ जपतःसदाजपमुपांशुवदनमभितोविसारिभिः
॥ तस्यदशकिरणैःशुशुभेपरिवेषभीषणमिवार्कमंडलं ॥ ८ ॥ कवचंसबिभ्रदुपवीतपदेनिहितसज्य
कार्मुकः ॥ शैलपतिरिवमहेंद्रधनुःपरिवीतभीमगहनोविदिद्युते ॥ ९ ॥ प्रविवेशगामिवकृशस्यनियम
सवनायगच्छतः ॥ तस्यपदविनमितोहिमवान्गुरुतांनयंतिहिगुणानसंहतिः ॥ १० ॥ परिकीर्णमुद्यतभु
जस्यभुवनविवरेदुरासदं ॥ ज्योतिरुपरिशिरसोविततंजगृहेनिजान्मुनिदिवौकसांपथः ॥ ११ ॥ रजनीषु
राजतनयस्यबहुलसमयेपिधामभिः ॥ भिन्नतिमिरनिकरनजहेशशिररश्मिसंगमयुजानभःश्रिया ॥
१२ ॥ महतामपश्रवनिचयेनशमितरुचिजिष्णुजन्मनाङ्कीतमिववनमसिवीतमलेनविराजतेस्मवपुरंशु

मालिमः ॥१३॥ तमुदीरितारुणजटांशुमधिगुणशरासनं जनाः ॥ रुद्रमनुदितललाटदृशं ददृशुर्बिभं-
थिषुमिवासुरीः पुरः ॥१४॥ मरुतां पतिः स्विदहिमांशुरुत पृथुशिखः शिखीतपः तप्तुमसुकरमुपक्रे-
मतेनजनोयमितिवपयेसतापसैः ॥१५॥ न ददाह भूरुहवनानि हरितनयधाम दूरगं ॥ न स्म नयति परिशोष-
मपः सुसहं बभूव न च सिद्धतापसैः ॥१६॥ विनयं गुणा इव विवेकमपनयभिदं नया इव ॥ न्यायमवधय इ-
वाशरणाः शरणं ययुः शिवमथो महर्षयः ॥१७॥ परिवीतमंशुभिरुदस्तदिनकरमयूखमंडलैः ॥ शंभु-
मुपहतदृशः सहसा न च ते निरीक्षितुमभिप्रसेहिरे ॥१४॥ अथ भूतभव्यभवदीशमभिमुखयितुं कृतस्त-
वाः ॥ तत्र महसि ददृशुः पुरुषं कमनीयविग्रहमयुग्मलोचनं ॥१५॥ ककुदे वृषस्य कृतबाहुमकृशप-
रिणाहशालिनि ॥ स्पर्शसुखमनुभवंतमुमाकुचयुग्ममंडल इवार्द्रचंदने ॥१६॥ स्थितमुन्नतेतु-

हिनशैलशिरसिवनानिवर्हिना।।साद्रिजलधिजलवाहपथंसदिगश्नुवानमिवविश्वमोजसा।।१७
।।अनुजानुमध्यमवसक्तचिततवपुषामहाहिना।। लोकमखिलमिवभूमिभृतारचितेजसामवधिना।
भिवेष्टितं।।१८।।परिणाहिनातुहिनराशिविशदं उपवीतसूत्रतां।।नितमुरगमनुरंजयताशितिनागले
नविलसन्मरीचिना।।१९।।वहुभिश्चवाहुभिरहीनभुजगवलयैर्विराजितं।।चंदनतरुभिरिवालघुभि
र्धवलायितैर्मलयमेदिनीभृतं।।२०।।लुतमालतीसितकपालकुमुदमुपरूढमूर्द्धजं।।शेषमिवसुरस
रित्पयसःशिरसाविकासिशशिधामविभ्रतं।।२१।।कुलकं।।सुनयस्ततोभिमुखमेत्यनयनविनिचे
शनोदिताः।।पाडुतनयतपसाजनितंजगतामशर्मभृशमाचचक्षिरे।।२२।।तरसैवकोपिभुवनैकपु
रुषःपुरुषस्तपस्यतिज्योतिरमलवपुषोपिरवेरभिभूयवृत्रइवभीमविग्रहः।।२३।।सधनुर्महेषुधिवि

स्त०१

किरा०
५२

भर्त्तिकवचमसिमुत्तमंजटाः वल्कमजिनमतिचित्रमिदंमुनितांविरोधिवचनास्पराजते ॥ २४ ॥ चलने
वनिस्खलितस्यकरणानियमेसदिग्मुखं ॥ स्तंभमनुभवतिशांतमरुद्ग्रहतारकागणयुतंनभस्तलं
॥ २५ ॥ सततेजसाविजितसारममरदितिजोपसंहितं ॥ विश्वमिदमपिदधातिपुराकिमिवास्तियन्न
सुकरंमनस्विनां ॥ २६ ॥ विजिगीषतेयदिजगंतियुगपदथसंजिहीर्षति ॥ प्रांमभवमभिवांछतिवा
वधमस्यनोविषहितुंक्षमारुचः ॥ २७ ॥ किमुपेक्षसेकथयनाथनतवविदितंनकिंचन ॥ त्रातुमल
ममयदर्हसिनस्त्वयिमास्मशासतिभवत्यराजयः ॥ २८ ॥ इतिगांविधायविरतेषुमुनिषुवचनंसमाददे
॥ भिन्नजलधिजलनादगुरुध्वनयन्दिशांविवरमंधकांतकः ॥ २९ ॥ बदरीतपोवननिवासनिरतम
वगातमान्यथा ॥ धातुमुदयनिधनेजगतांनरमंशमादिपुरुषस्यगांगतं ॥ ३० ॥ द्विषतःपरासिसि

पु ४
५२

राम
५२

पुरेषसकलभुवनाभितापिनः॥ क्रांतकुलिशकरवीर्यवलान्मदुपासनंविहितवान्महत्तपः॥ ३५॥
अयमच्युतश्चवचनेनसरसिरुहजन्मनःप्रजाः॥ पातुमसुरनिधनेनविभूभुवमभ्युपेत्यमनुजेषुति
ष्ठतः॥ ३६॥ सुरकृत्यमेतदवगम्यनिपुणमितिमूकदानवः॥ हंतुमभिपततिपांडुसुतंत्वरयातदत्रस
हगम्यतांमया॥ ३७॥ विवरेपिनैनमतिगूढमभिभवितुमेषपारयन्॥ पापनिरतिरविशंकितयाविजयं
व्यवस्यतिवराहमायया॥ ३८॥ निहतेविडंवितकिरातनृपतिवपुषारिपौमया॥ मुक्तनिशितविशि
खः प्रसभंमृगयाविवादमयमाचरिष्यति॥ ३९॥ तपसानिपीडितकृशस्यविरहितसहायसंपदः॥ स
त्वविहितमतुलंभुजयोर्वलमस्यपश्यतमृधेधिकुप्यतः॥ ४०॥ इतितानुदारमनुनीयविषमहरिचंद्र
नालिना। घर्मजनितपुलकेनलसद्गजमौक्तिकावलिगुणेनवक्षसा॥ ४१॥ वदनेनपुष्पितल

तांतनियमितचिलंविमोलिना॥विभ्रदूर्णानयनेनरुचेसिखिपिछलांछितकपोलभित्तिना॥४२॥
श्वहदुद्दहन्जलदनाद्धिधन्नुरूपहितैकमार्गणं॥मेघनिचयइवसंववृतेरुचिरःकिरातपृतनापतिःशि
वः॥४३॥कुलकं॥अनुकूलमस्यचविचिंत्यगणपतिभिरात्तविग्रहैः॥शूलपरशुशरचापभृतीमहती
वनेचरचमूर्विनिर्ममे॥४४॥विरचय्यकाननविभागमनुगिरमथेश्वराज्ञया॥भीमनिनदपिहितोरु
भुवःपरितोपदिश्यमृगयांप्रतस्थिरे॥४५॥क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनै
ः॥पूर्णपृथुवनगुहाविवरसहसाभयादिवरसासभूधरः॥४६॥नविरोधिनीरुषमियायपथिमृगवि
हंगसंहतिः॥घ्नंतिसहजमपिभूरिभियःसममागताःसपदिवैरमापदः॥४७॥चमरीगणैर्गणबल
स्यबलवतिभयेप्युपस्थिते।वंशविततिषुविषक्तपृथुप्रियबालवालधिभिराददेधृतिः॥४८॥ह

रसैनिकाःप्रतिभयेपिगजमदसुगंधिकेसरैः॥स्वस्थमभिददृशिरेसहसाप्रतिबोधजृंभितमुखैर्मृ
गाधिपैः॥४९॥विभरांबभूवुरपवृत्तजठरशफरीकुलाकुलाः॥पंकविषमिततटाःसरितःकरिरुग्णच
न्दनरसारुणंपयः॥५०॥महिषक्षतागुरुतमालनलदसुरभिःसदागतिः॥व्यस्तशुकनिभशिलाकुसु
मःप्रणुदन्ववौवनसदांपरिश्रमं॥५१॥मथितांभसोरयविकीर्णमृदितकदलीगवेधुकाः॥क्लांतजलरु
हलताःसरसीर्विदधेनिदाघइवसत्वविप्लवः॥५२॥इतिचालयन्नचलसानुवनगहनजानुमापतिः॥प्राप
मुदितहरिणीदशनक्षतवीरुधंवसतिमैंद्रसूनवी॥५३॥सततमासमसादघननीलमभिमुखमुपस्थितंमु
नेः॥पोत्रनिकषणविभिन्नभुवंदनुजंदधानमतिसौकरंवपुः॥५४॥कक्षांतेसुरसरितोनिधायसेनाम
न्वितःसकतिपयैःकिरातवर्यैः॥प्रच्छन्नस्तरुगहनैःसगुल्मजालैर्लक्ष्मीवाननुपदमस्यसंप्रतस्थे॥

॥५५॥इतिश्रीकिरातार्जुनीएमहाकाव्येश्रीमद्भारविकृतौलक्ष्मंकेइन्द्राभिगमनोनामद्वादशःसर्गः॥ व
पुषापरमेणभूधराणामथसंभाव्यपराक्रमंविभेदे॥मृगमाशुविलोकयांचकारस्थिरदंष्ट्राग्रमुखंमहें
द्रसूनुः॥१॥ स्फुटबद्धसटोन्नतिःसदूरादभिधावन्नवधीरितान्यकृत्यः॥जयमिछतितस्यजातसंकेमन
सीमंमुहुराददेवितर्कं॥२॥वनपोत्रविकीर्णशालमूलोनिविडस्कंधनिकाषरुग्णवप्रः॥अयमेकचरो
भिवर्त्ततेमांसमरायेवसमाजुहूषमाणः॥३॥इहवीतभयास्तपोनुभावाज्जहतिव्यालमृगाःपरेषुवृ
त्तिं॥मयितांसुतरामसौविधत्तेविकृतिःकिंनुभवेदियंनुमाया॥४॥अथवैषकृतज्ञयेवपूर्वंभृशमासे
वितयारुषानमुक्तः॥अवधूयविरोधिनीःकिमारान्मृगजातीरभियातिमांजवेन॥५॥नमृगःखलु
कोप्ययंजिघांसुस्स्खलतित्यत्रतथाविधंमनोमे॥ विमलंकलुषीभवच्चचेतःकथयत्येवहितेषि

णंरिपुंवा॥६॥मुनिरस्मि निरागसः कुतोमेभयमित्येषनभूतयेभिमानः॥परवृद्धिषुवद्धमत्सराणांकि
मिवह्यस्तिदुरात्मनामलंघ्यं॥ ७॥दनुजःस्विदयंनिशाचरोवावनजेनेतिवलंवतास्तिसत्वे॥अभिभूयत
याहिमेद्यनीलःसकलंकंपयतीवशैलराजं॥८॥अयमेवमृगव्यसत्रकामःप्रहरिष्यन्मयिमाययाशमस्थं
॥पृथुभिर्ध्वजिनीरवैरकार्षीच्चकितोद्रुतमृगाणिकाननानि॥९/वहुशःकृतसत्कृतेर्विधातुंप्रियमिच्छ
न्नथवासुयोधनस्य॥क्षुभितंवनगोचराभियोगाद्गणमाशिश्रियदाकुलंतिरश्चां॥१०॥अवलीढसना
भिरश्वसेनःप्रसभंखांडवजातवेदसावा॥प्रतिकर्तुमुपागतःसमन्युःकृतवैरोयदिवावृकोदरेण॥११॥वलशा
लितयायथातथावाधियमुच्छेदपरामयन्दधानः॥नियमेनमयानिवर्हणीयःपरमंलाभमरातिभंगमाहुः
॥१२॥कुरुतातनपांस्यमार्गदायीविजयायेत्यलमन्वशान्मुनिर्मां॥वलिनश्चवधादृतेस्यशक्यंव्रतसंरक्ष

णमन्यथा न कर्तुं ॥१३॥ इति तेन विचिंत्य चापनाम प्रथमं पौरुषचिह्नमाललंबे ॥ उपलब्धगुणः परस्य
भेदे सचिवः शुद्ध इवाददे च बाणः ॥१४॥ अनुभाववता गुरु स्थिरत्वादविसंवादि धनुर्धनंजयेन ॥ स्वबलव्य
सनेपि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥१५॥ प्रविकर्षणनादभिन्नरंध्रः पदविष्टंभनिपीडितस्त
दानीं ॥ अधिरोहति गांडिवं महेषौ सकलः संशयमारुरोह शैलः ॥१६॥ ददृशे च सविस्मयं शिवेन स्थिरपू
र्णायतचापमण्डलस्थः रचितस्तिसृणां पुरां विधातुं वधमात्मेव भयानकः परेषां ॥१७॥ विचकर्ष च संहि
तेषु रुद्धैः स्फुरणास्कंहननामिताचलेंद्रः ॥ धनुराततभोगवासुकिज्यावदनग्रंथिविमुक्तवह्निरंशुः ॥
१८॥ स भवस्य भवक्षयैकहेतोः सितसप्तेश्च विधास्यतोः सहायं ॥ रिपुराप पराभवाय मध्यं प्रकृतिप्रत्य
ययोरिवानुबंधः ॥१९॥ अथ दीपितवारिवाहवर्त्मा रववित्रासितवारणादचार्यः ॥ निपपात जवादि

ष्णुः पिनाकान्महतोऽथ दिव्ये धृतः कृशानुः ॥२०॥ व्रजतोस्य बृहत्पतत्रजन्मा कृततार्क्ष्योपनिपातवेगशंकः ॥
प्रतिनादमहान्महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः ॥२१॥ नयनादिव शूलिनः प्रवृत्तैर्मनसोप्याशुतरं यतः
पिशंगैः ॥ विदधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः ॥२१॥ अपवर्ज्य धनुषः शिवान्तिकस्थैर्वि
वरेसद्भिरभिख्यया जिहानः ॥ युगपद्ददृशे विशन्वराहं तदुपोढैश्च नभश्चरैः पृषत्कः ॥२२॥ स तमालनिभे
रिपौ सुराणां घननीहार इवाविषक्तवेगः ॥ भयविप्लुतमीक्षितो नभःस्थैर्जगतीं ग्राह इवापगां जगाहे ॥२३
सपदि प्रियरूपपर्वलेखः शितलोहाग्रमुखः खमाससाद ॥ कुपितान्तकतर्जनांगुलिश्रीर्व्यथयन्प्राणभृ
तः कपिध्वजेषुः ॥२४॥ परमास्त्रपरिग्रहोरुतेजः स्फुरदुल्काकृति विक्षिपद्वनेषु ॥ स जवेन पतन्परः शता
नां पततां व्रात इवारवं वितेने ॥२५॥ अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः ॥ सह पूर्व

तरंन्तु चित्तवृत्तेरपनित्वान्नुचकारलक्ष्मभेदं ॥ शह ॥ सवृषध्वजसायकावभिन्नंजयहेतुः प्रतिकायमेषणीयं
॥ लघुसा ॥ धयितुं शरश्चसेहे विधिनेवार्थमुदीरितं प्रयत्नः २७ अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव
संश्रितानुरागं विजिगीषुमिवानयप्रमादाववसादं विशिखौ विनिन्यतुस्तं २८ अथदीर्घतरंत(
मःप्रवेक्ष्यन्सहसाभग्नरयःससंभ्रमेण। निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुंधरां च [illegible] मेने
२९ सगतः क्षितिमुष्णशोणितार्द्रः खुरदंष्ट्राग्रनिपातदारिताश्मा असुभिः क्षणमीक्षितेन्द्रसूनुर्वि
हितामर्षगुरुध्वनिर्निरासे ३० स्फुटपौरुषमाससादपार्थस्तमथप्राज्यशरः शरंजिघृक्षुः नतथा(
कृतवेदिनांकरिष्यन्प्रियतामेति यथाकृतावदानः ३२ उपकार इवासतिप्रयुक्तः स्थितिमप्राप्यमृगे
गतःप्रणाशं कृतशक्तिरधोमुखोगुरुत्वाज्जनितव्रीड इवात्मपौरुषेण ३६ ससमुद्धरताविचिंत्यतेन

स्वकृतं कीर्त्तिमिवोज्वलां दधानः ॥ अनुयुक्त इव स्ववार्त्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्यां ॥ ३४ ॥ सु(
गंम ॥ तत्र कार्मुकधरं महाभुजः पश्यति स्म सहसा वनेचरं ॥ सन्निकाशयितुमग्रतः स्थितं शासनं कुसुम
चापविद्विषः ॥ ३५ ॥ सप्रयुज्य तनये महीपतेरात्मजातिसदृशीं किलानतिं ॥ सांत पूर्वमभिनीतहेतुकं
वक्तुमिद्धमुपचक्रमे वचः ॥ ३६ ॥ शांततावि नययोगि मानसं भूरिधाम विमलं तपः श्रुतं ॥ आह ते नु
सदृशी दिवौकसामन्ववाय मचदात्तमाकृतिः ॥ ३७ ॥ हीपितस्त्वमनुभावसंपदा गौरवेण लघयन्महीभृतः ॥
राजसे मुनिरपीह धारयन्नाधिपत्यमिव शातमन्यवं ॥ ३८ ॥ तापसोपि विभुना मुपेयिवानास्पदं त्वमसि
सर्वसंपदां ॥ दृश्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः ॥ ३९ ॥ विस्मयः क इव वा जयश्रियानै
वमुक्तिरपि ते दवीयसी ॥ ईप्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥ ४० ॥ ह्रेपयन्नहिम

किरा०
५७
57

तेजसंद्विषासत्वमित्थमुपपन्नपौरुषः॥ हर्तुमर्हसिवराहभेदिनंनैनमस्मदधिपस्यसायकं॥४१॥
स्मर्यतेतनुभृतांसनातनंन्याय्यमाचरणमुत्तमैरभिः॥ ध्वंसतेयदिभवादृशस्ततःकःप्रयातुवदतेनवर्त्म
ना॥४२॥ आकुमारमुपदेष्टुमिच्छवःसन्निवृत्तिमपथान्महापरः॥ योगशक्तिजितन्ममृत्यवःशील
यंतिमुनयःसुशीलतां॥४३॥ तिष्ठतांतपसिपुण्यमासजन्संपदोनुगुणयन्सुखैषिणां॥ योगिनांप
रिणमन्तिमुक्तयेकेननास्तुविनयःसतांप्रियः॥४४॥ नूनमत्रभवतःशराकृतिंसर्वथायमनुयाति
सायकः॥ सोयमित्यनुपपन्नसंशयःकारितस्त्वमपदेपदंयया॥४५॥ अन्यदीयविशिखेनकेवलंनि
स्पृहस्यभवितव्यमाहृते॥ निघ्नतःपरनिबर्हितंमृगंव्रीडितव्यमपितेसचेतसः॥४६॥ संततंनिशम
यंतउत्तमकार्यैःप्रयांतिमुदमस्यसूरयः॥ कीर्तितानिहसितेपितानियंव्रीडयंतिचरितानिमानि

राम
५७

नं॥४७॥अन्यदोषमिवसत्स्वकंगुणंख्यापयेत्कथमदृष्टताजडः॥उच्यतेसखलुकार्यवत्तयाधि(
ग्विभिन्नबुधसेतुमर्थितां॥४८॥युग्मं॥दुर्वचंतदथमास्मभून्मृगस्त्वय्यसौयदकरिष्यदोजसा॥नैन
माशुयदिवाहिनीपतिःप्रत्यपत्स्यतशितेनपत्रिणा॥४९॥कोन्विमंहरितुरंगमायुधस्थेयसींदधतमंग(
संहतिं॥वेगवत्तरमृतेचमूपतेर्हन्तुमिच्छतिशरेणदंष्ट्रिणं॥५०॥मित्रमिष्टमुपकारिसंशयेमेदिनीपति
रयंतथाचते॥तंविरोध्यभवतानिरासिमासज्जनैकवसतिःकृतज्ञता॥५१॥लभ्यमेकसुकृतेनदुर्लभार(
क्षितारमसुरक्ष्यभूतयः॥स्वंतमंतविरसाःजिगीषतांमित्रलाभमनुलाभसंपदः॥५२॥चंचलंवसुनि
तांतमुन्नतामेदिनीमपिहरंत्यरातयः॥भूधरस्थिरमुपेयमागतंमावमंस्तसुहृदंमहीपतिम्॥५३॥
जेतुमेवभवता[illegible]तपस्यतेनायुधानिरक्षतेमुमुक्षवः॥प्राप्यतेचसकलंमहीभृतःसंगतेननतपसः

फलं त्वया ॥५४॥ वाजिभूमिरिभराजकाननं संति रत्ननिचयाश्च भूरयः ॥ कांचनेन किमिवास्य पत्रिणा
केवलं न सहते विलंघनं ॥५५॥ सावलेपमुपलिप्सिते परैरभ्युपैति विकृतिं रजस्यपि ॥ प्रार्थितस्तु न महा
न्समीहते जीवितं किमु धनं धनायितुं ॥५६॥ तन्नदीयविशिखातिसर्जनादस्तु वां गुरु यदृच्छयागतं ॥ राघ
वप्लवगराजयोरिव प्रेम युक्तमितरेतराश्रयं ॥५७॥ नाभियोक्तुमनृतं त्वमिष्यसे कस्तपस्विविशिखेषु
चादरः ॥ संति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः ॥५८॥ मार्गणैरथ तव प्रयोजनं नाथसे
किमु पतिं न भूभृतः ॥ त्वद्विधं सुहृदमेत्य सोऽर्थिनं किं न यच्छति विजित्य मेदिनीं ॥५९॥ तेन सूरिरुप
कारिताधनः कर्त्तुमिच्छति न याचितं वृथा ॥ सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभंगवेदनां ॥६०॥
शक्तिरर्थपतिषु स्वयंग्रहं प्रेमकारयति वा निरत्ययं ॥ कारणद्वयमिदं निरस्यतः प्रार्थनाधिकव

लेविपत्फला॥६१॥अस्त्रवेदमधिगम्यतत्वतःकस्यचेहभुजवीर्यशालिनः॥जामदग्न्यमपहायगीयते
तापसेषुचरितार्थमायुधं॥६२॥अभ्यघानिमुनिचापलायाॅयन्मृगःक्षितिपतेःपरिग्रहः॥अक्षमिष्टत
दयंप्रमाद्यतांसंश्रयेणातिखलुदोषमज्ञता॥६३॥जन्मवेषतपसांविरोधिनीमाकृथाःपुनरमूमपक्रियां
॥आपदेत्युभयलोकदूषिणीवर्त्तमानमपथेहिदुर्मतिं॥६४॥यष्टुमिच्छसिपितॄन्नसंयतोनत्वमर्चिच
यिषुर्दिवौकसः॥दातुमेवपदवीमसिक्षमःकिंमृगेंगविशिखंन्यवीविशः॥६५॥सज्जनोसिविजहीं
हिचापलंसर्वदाकइवयःसहिष्यते।वारिधीनपियुगांतवायवःक्षोभयन्त्यनिभृतागुरूनपि॥६६॥
अस्त्रवेदविदयंचमूपतिःपार्वतीयइतिमावजीगणः॥गोपितुंभुवमिमांमरुत्वताशैलवासमनुनीयलं
॥भितः॥६७॥तन्निनितिक्षितमिदंमयामुनेरित्यवोचतपुनःसभूपतिः॥बाणमत्रभवतेनिजंदिशन्नप्राप्नु(

किरा०
५९
59

हित्वमपिसर्वसंपदः॥६८॥ आत्मनीनमुपतिष्ठते गुणाःसंभवंतुपरमंनिचायदः॥ इत्यनेकफलभाजि(
मास्मभूदर्थिताकथमिवार्यसंगमे॥६९॥ इत्युदीरतामयमनोकहांतरेतिग्महेति एतनाभिरन्वितः॥ साहि
वीचिरिवसिंधुरुद्धतोभूपतिःसमयसेतुवारितः॥७०॥ सज्जधनुर्वहतियोहिपतिस्थवीयःस्थेयानु
जयैहरितुरंगमकेतुलक्ष्मी॥ अस्यानुकूलयमतिं [illegible] मतिमन्ननेनसख्यासुखंसमभियास्य(
सिचिंतितानि॥७१॥ इति श्रीकिरातार्जुनीये महाकाव्ये भारविकृतौ लक्ष्मांके मूकदानव
वधो नाम त्रयोदश सर्गः॥ ॥ततःकिरातस्यवचोभिरुद्धतैःपराहतःशैलइवार्णवांबुभिः॥जहौ
नधैर्यंरुषितोपिपांडवःसुदुर्ग्रहांतःकरणाहिसूरयः॥१॥ असेषमुक्तिंगितशात्रवेंगितःकृती(
गिरांविस्तरतत्वसंग्रहे॥ इदंप्रमाणीकृतकालसाधनःप्रशांतसंरंभइवाददेवचः॥२॥ विचित्रवर्णा

राम
५९

भरणासुखश्रुतिःप्रसादयंतीहृदयान्यपिद्विषां ॥ प्रवर्त्ततेनाकृतपुण्यकर्मणांप्रसन्नगंभीरपदासरस्वती
॥ ३ ॥ भवंतितेसभ्यतमाविपश्चितांमनोगतंवाचिनिवेशयंतिये ॥ नयंतितेष्वप्युपपन्ननैपुणागंभीरमर्थंक
तिचित्प्रकाशतां ॥ ४ ॥ स्तुवंतिगुर्वीमभिधेयसंपदंविशुद्धिमुक्तेरपरेविपश्चितः ॥ इतिस्थितायांप्रतिपूरु
षंरुचौसुदुर्लभाःसर्वमनोरमागिरः ॥ ५ ॥ समस्यसंपादयतागुणैरिमांत्वयासमारोपितभारभारती ॥ प्र
गल्भमात्माधुरिधुर्यवाग्मिनांवनेचरेणापिमताधिरोपितः ॥ ६ ॥ प्रयुज्यसामाचरितंविलोभनंभ
यंविभेदायधियःप्रदर्शितं ॥ तथाभियुक्तंचशिलीमुखार्थिनायथेतरंन्याय्यमिवावभासते ॥ ७ ॥
विरोधिसिद्धेरिवकर्तुमुद्यतःसवारितःकिंभवतानभूपतिः ॥ हितेनयोज्यःखलुभूतिमिच्छतास
हार्थनासेनन्रूपोनुजीविना ॥ ८ ॥ ध्रुवंप्रणाशःप्रहितस्यपत्रिणःशिलोच्चयेतस्यविमर्गणंनयः

॥ नपुक्कमत्रार्यजनानिलं ध्रुवं हिशात्ययायं महतामतिक्रमः ॥९॥ अतीतसंख्या विहिता ममाग्निना शिलीमु
खाः खांडवमत्तुमिच्छता ॥ अनाहतस्यामरसायकैर्वपि स्थिता कथं शैलजनात्पुधेष्टतिः ॥१०॥ यदि प्रमा
णीकृतमार्यचेष्टितं किमित्यदेशे विपितिरस्कृता वयं ॥ अयातपूर्वा परिवादगोचरं सतां हि वाणी गुणमेव
भाषते ॥११॥ गुणापवादेन तदन्यरोपणैर्भृशाधिरूढस्य समंजसं जने ॥ द्विधेव कृत्वा हृदयं निगूहतः
स्फुरन्नसाधोर्विवृणोति वागसिः ॥१२॥ वनाश्रयाः कस्य मृगाः परिग्रहाः शृणाति यस्तान्प्रसभं हि तस्य ते
॥ प्रहीयतामत्र नृपेण मानिता न मानिता चास्ति भवंति च श्रियः ॥१३॥ न वर्त्म कस्मै चिदपि प्रदीयतामि
ति व्रतं मे विहितं महर्षिणा ॥ ॥ जिघांसुरस्मान्निहतो मया मृगो व्रताभिरक्षा हि सतामलं क्रिया ॥१४॥
॥ मृगान्विनिघ्नन्मृगयुः स्वहेतुना कृतोपकारः कथमिच्छतां तपः ॥ कृपेति चेदस्तु मृगः कृतः कृ

एणाहनेन न पूर्वं न मयेति का गतिः ॥१५॥ अनायुधे सत्त्वजिघांसिते मुनेः कृपेति वृत्तिर्महतामकृत्रिमा ॥ श
रासनं बिभ्रति सज्यसायकं कृतानुकंपः स कथं प्रतीयते ॥१६॥ अथो शरस्तेन मदर्थमुज्झितः फ
लं हि तस्य प्रतिकायसाधनं ॥ अविक्षते तत्त्वमपास्य सात्त्विके कृतार्थता नाभ्यधिका चमूपते ॥१७॥ यदा स्व
कामं भवता सपाच्यता मितिक्रमं नैतदनल्पचेतसां ॥ कथं प्रसत्त्याहरणैषिणां प्रियाः परावनत्या मलि
नीकृताः श्रियः ॥१८॥ अभूतमासज्य विरुद्धमीहितं बलादलभ्यं तव लिप्सते नृपः ॥ विजानतोपि त्वयन
यस्य रौद्रतां भवत्यपाये परिमोहिनी मतिः ॥१९॥ असिः शरा वर्म धनुश्च नोच्चकैर्विविच्य किं प्रार्थितमी
श्वरेण ते ॥ अथास्ति शक्तिः कृतमेव याच्ञया न दूषितः शक्तिमतां स्वयंग्रहः ॥२०॥ सखा स युक्तः क
थितः कथं त्वया यदृच्छयासूयति यस्तपस्यते ॥ गुणार्जनोच्छ्रायविरुद्धबुद्धयः प्रकृत्यमित्रा हि सताम

साधवः ॥२१॥ वयं क्व वर्णाश्रमपालनोचिताः क्व जातिहीना मृगजीवितच्छिदः। सहापकृष्टैः महतां न संग
तं भवन्ति गोमायुसखा न दन्तिनः ॥२२॥ परोवजानातीति यदज्ञताजडस्तदुन्नतानां न विहन्ति धीरतां। समानवी
र्यान्वयपौरुषेषु यः करोत्यतिक्रान्तिमसौ तिरस्क्रिया ॥२३॥ यदा विगृह्णाति हतं तदा यशः करोति मैत्री
मथ दूषिता गुणाः। स्थितिं समीक्ष्योभयथा परीक्षकः करोत्यवज्ञोपहतं पृथग्जनं ॥२४॥ मया मृगा
न्हन्तुरनेन हेतुना विरुद्धमाक्षेपवचस्तितिक्षितं। शरार्थमेष्यत्यथ लप्स्यते गतिं शिरोमणिं दृष्टिवि
षाज्जिघृक्षतः ॥२५॥ इतीरिताकूतमनीलवाजिनं जयाय दूतः प्रतितर्ज्य तेजसा। ययौ समीपं ध्व
जिनीमुपेयुषः प्रसन्नरूपस्य विरूपचक्षुषः ॥२६॥ ततोपवादेन पताकिनीपतेश्चचाल निर्ह्रादव
ती महाचमूः। युगान्तवाताभिहतेव कुर्वती निनादमम्भोनिधिवीचिसंहतिः ॥२७॥ रणाय जैत्र

ःश्रहिशश्चिवत्वरांतरं गिनालंवितविद्धसंवृतिः॥ पुरोवलानांसघनांबुसीकरः शनैःप्रवृत्तस्त्वसुर
भिःसमीरणः॥२८॥ जयारवक्ष्वेडितनादमूर्छितः शरासनज्यातलवारणध्वनिः॥ असंभवन्भूधरराज
कुक्षिषुप्रकंपयन्गामिवतस्तरेदिशः॥२९॥ निशातरौद्रेषुविकाशतांगतैः प्रदीपयद्भिःक
कुभामिवांतरं॥ वनेसदांहेतिषुभिन्नविग्रहैर्विपुस्फुरेरश्मिवतामरीचिभिः॥३०॥ उदूढवक्षः
स्थगितैकदिङ्मुखोविकृष्टविस्फारितचापमंडलः॥ वितत्यपक्षद्वयमायतंवभौविभुर्गणा
नामुपरीवमध्यगः॥३१॥ समेषुदुर्गेषुचतुल्यविक्रमैर्जवादहंपूर्विकयापियासुभिः॥ गणैरर
विच्छेदनिरुद्धमावभौवनंनिरुच्छ्वासमिवाकुलाकुलं॥३२॥ तिरोहितस्वभ्रनिकुंजरोधसः
समस्तुवानाःसहसातिरिक्ततां॥ किरातसैन्यैरपिधायरेचिताभुवःक्षणेनिम्नतयेवभेजिरे

किरा०
६२

॥३३॥ एघूढ्डपर्यस्तरुहहस्तनांततनिर्जवानिलापूर्णितशालचंदना ॥ गणाधियानोपरित
तप्रसारिणीवनान्यवाचीवचकारसंहतिः॥३४॥ ततःसदर्पंप्रततनुंतयस्ययामदस्रुतिक्षाममि
वैकवारणं॥ परिज्वलंतंनिधनायभूभृतांदहंतमाशाइववजातवेदसं॥३५॥ अनादरोपात्तधृ
तैकसायकंजयेनुकूलेसुहृदीवसस्पृहं॥ शनैरपूर्णप्रतिकारयेसलेनिवेसयंतंनयनेब
लोदधौ॥३६॥ निषन्नमापत्प्रतिकारकारणेशरासनेधैर्यइवानपायिनि॥ अलंघनीयंप्रकृ
तावपिस्थितंनिवाततिनिःकंपमिवापगापतिं॥३७॥ उपेयुषीविभ्रतमंतकद्युतिंवधाददूरेप
तितस्यदंष्ट्रिनः॥ पुरःसमावेशितसत्पशुंद्विजैःपतिंपशूनामिवहूतमध्वरे॥३८॥ निजेननी
तंविजितान्यगौरवंगभीरतांधैर्यगुणेनभूयसा॥ वनोदयेनेवघनोरुवीरुधासमंधकारीकृतमु

राम
६२

त्नमावलं ॥३९॥ महर्षभस्कंधमनूनकंधरं बृहच्छिलावप्रघनेनवक्षसा ॥ समुज्जिहीर्षुं जगतीं म
हाभरां महावराहं महतोर्णवादिव ॥४०॥ हरिन्मणिश्याममुदग्रविग्रहं प्रकाशमानं परिभूय देह
हिनः ॥ मनुष्यभावे पुरुषं पुरातनं स्थितं जलादर्शइवांशुमालिनं ॥४१॥ गुरुक्रियारंभफलैरलं
कृतं गतिं प्रतापस्य जगत्प्रमाथिनः ॥ गणाः समासेदुरनीलवाजिनं महाचलं तोयघनाघनाइव ॥
४२ ॥ कुलकं ॥ यथास्वमासंसितविक्रमाः पुरो मुनिप्रभावक्षततेजसः परे ययुःक्षणादप्रतिपत्तिरी
नतां महाहिंसारःप्रतिहंतिपौरुषं ॥४३॥ ततःप्रजज्ञे सममेव तत्र तैरपेक्षितान्योन्यबलोपपत्तिभिः ॥ म
होदयानामपि संघवृत्तितां सहायसाध्याः प्रदिशंति सिद्धयः ॥४४॥ किरातसैन्यादुरुचापनोदिताः समं
समुत्पेतुरुपात्तरंहसः ॥ महावनादुन्मनसःखगाइव प्रवृत्तपत्रध्वनयः शिलीमुखाः ॥४५॥ गभीररं

किरा०
६३
63

धृषु भृशं महीभृतः प्रतिस्वनैरुन्नदितेषु सानुषु॥ धनुर्निनादेन जवादुपेयुषा विभिद्यमाना इव दध्वनुर्दिशः॥४६॥ विधूनयन्ती गहनानि वीरुधां तिरोहितोपांतनभोदिगंतरा॥ महीयसी वृष्टिरिवानिलेरिता रवं वितेने गणामार्गणावलिः॥४७॥ त्रयीमृतूनामनिलासिनः सतः प्रयाति पोषं वपुषि प्रहृष्यतः॥ रणाय जिष्णोः विदुषेव सत्वरं घनत्वमीये शिथिलेन वर्मणा॥४८॥ पतत्सु शस्त्रेषु वितत्य रोदसी समंततस्तस्य धनुर्दुधूषतः॥ सरोषमुल्केव पपात भीषणा बलेषु दृष्टिर्विनिपातसंशिनी॥४९॥ दिशः समूहन्निव संहरन्निव प्रभां रवेराकुलयन्निवानिलं॥ मुनिश्चचाल क्षयकालदारुणः क्षितिं सशैलां चलयन्निवेषुभिः॥५०॥ विमुक्तमाशंशितशत्रुर्निर्जयैरनेकमेकावसरं वनेचरैः॥ स निर्जघानायुधमंतरा शरैः क्रियाफलं काल इवातिपातितः॥५१॥ गतैः परेषामविभाविनीयतां निवारयद्भिर्विपदं विदूरगैः॥ भृशं वभू

राम
६३

वोपचितोप्यहत्फलैः शरैरुपायैरिवपाडुनंदनः ॥५१॥ शिवः पृथिव्याः ककुभांनुमंडलात्पतंतिविंवादस्यतिग्म
तेजसः ॥ सकृद्विकृष्टादथकार्मुकान्मुनेः शराः शरीरादितितेभिमेनिरे ॥५३॥ गणाधिपानामविधायनिर्ग(
तैः परासुतांमर्मविदारणैरपि ॥ जवादतीयेहिमवानधोमुखैः कृतापराधैरिवतस्यपत्रिभिः ॥५४॥ द्विषांक्ष
तीर्याः प्रथमेशिलीमुखाविभिद्यदेहावरणानिचक्रिरे ॥ नतानुपेतेविशिखैः पुनर्मुनेररुंतुदत्वंमहतां
ह्यगोचरः ॥५५॥ समुज्झितायावदरातिनिर्यतीसहैवचापान्मुनिवाणसंहतिः ॥ प्रभाहिमांशोरिवपंक
जावलिंनिनायसंकोचमुमापतेश्चमूं ॥५६॥ अजिह्ममोजिष्ठममोघमक्लमंक्रियासुवह्वीषुपृथ(
ग्विधोजितं ॥ प्रसेहिरेसादयितुंनसादिताः शरौघमुत्साहमिवास्यविद्विषः ॥५७॥ शिवध्वजिन्याः प्रतियो
धमग्रतः स्फुरंतमुग्रेषुमयूखमालिनं ॥ नमेकदेशस्थमनेकदेशगानिदद्शुरर्कंयुगपत्प्रजाइव ॥

५८॥ मुनेः शरीरेवेगानदुग्रंरहसावलंप्रकोपादिवविषघ्नगायत्ता॥ विधूनितं भ्रांतिमिपायसंगिनीमहा
निलेनेवनिदाघजंरजः॥५९॥ तपोवलेनेषविधायभूयसीस्तनूरदृश्याः स्विदिषून्विमुंचति॥ अमुष्य
मायाविहितंनिहंतिनः प्रतीपमागत्यकिमुस्वमायुधं॥६०॥ हृतागुणैरस्यभयेनवामुनेस्तिरोहि
ताः स्वित्सहरंतिदेवताः॥ कथंत्वमीसंततमस्यसायकाभवंत्यनेकेजलधेरिवोर्मयः॥६१॥ जयेनक
च्चिद्विरमेदयंरणाद्भवेदपिस्वस्तिचराचरायवा॥ ततापकीर्णान्नृपस्तनुमार्गणैरितिप्रतर्क्याकुलि
तापताकिनी॥६२॥ कुलकं॥ अमर्षिणाकृत्यमिवक्षमाश्रयंमदोद्धतेनेवहितंप्रियंवचः॥ वलीय
सातद्विधिनेवपौरुषंवलंनिरस्तंनरराजजिष्णुना॥६३॥ प्रतिदिशंप्लवगाधिपलक्ष्मणावि
शिखसंहतिनापितमूर्त्तिभिः॥ रविकरग्लपितैरिववारिभिः शिववलैः परिमंडलतादधे॥६४॥ प्रविततशश

केतूकृतत्रैलिक्यत आरोपितः ५ द्वैर्मिमानहन्तुमानवानरोयेन ५ खंडिताआशंसा अभिलाषोयथासातया ४ पराङ्मुखतया शोकेमुखेन पलायनेनेत्यर्थः ६

अभजन् ३ भयपिहितं ४

रजालच्छन्नविश्वांतरालेविधुवतिधनुराविर्मंडलंपांडुसूनौ॥कथमपिजयलक्ष्मीभीतभीताविहातुं
हातुंविषमनयनसेनापक्षपातंविषेहे॥६५॥इतिश्रीकीरातार्जुनीयेमहाकाव्येभारविकृतौचतुर्द
शःसर्गः॥॥अथभूतानिवार्त्रघ्नशरेभ्यस्तत्रतत्रसुः॥भेजेदिशःपरित्यक्तमहेष्वासाचसावमूः॥१॥अपश्य
द्भिरिवेशानंरणान्निवर्तितेगणैः॥मुत्पथैस्तैवहितस्कंधुसंभ्रमज्वरितंमनः॥२॥खंडिताशंसयातेषांपराङ्मुख
तयातया॥आविवेशकृपाकेतोकृतोर्वैवीनरंनरं॥३॥आस्थामालंव्यनीतेषुवंशन्कुरुषरातिषु॥
व्यक्तिमायातिमहतांमाहात्म्यमनुकंपया॥४॥ससासिःसासुसूःसासोयेयायेयाययाययः॥ललौली
लांलल्लोलःशशीशशिशुशीःशशन्न॥५॥एकाक्षरपादः॥त्रासजिह्मंयतश्चैतान्मंदमेवान्वियाय
यमः॥नातिपीडयितुंभग्नानिच्छन्तिहिमहौजसः॥६॥अथाग्रेहसतासाचिस्थितेनस्थिरकीर्तिना

अविलोकय द्भिः ३

असन् प्राणान् सुवते प्रेरयती त्यसुसूः बाणः अस्तुसूमिः सह वर्त्तते इति सासुसूः स बाणः ३

महतां माहात्म्यं महानुभावत्वं व्यक्तिं स्फुटतां याति ३

विहगराशिः तः २

शोभां लल्लोप्राप्तः २

लो २ तस्य शिशुः स्कंदः ते श्रराति हि ४ असिना सह ४ पोरुषमाश्रित्य ४ अस्यते शरा अनेनेत्यासो धनुः आसेन सह वर्त्तते इति सासः ३

प्लुतरात्या गच्छत् २ नस्मि २ सर्वतः २ तिर्यक् स्थित्वा मंदशनैः कोमलमनुजगाम २

१

पुष्पामिनित्यथाहाररः १ किंचित्प्रमुमितमनसा २ समरं तु न्यारं तव्ये न श्रीहितेन संयत स ग्रामो मे घा ते वा संलोनं सुखसाध्य ५

पल्लायमाना गणाव कुमारश्चा १ क्रगानामधयं मागैस्तो ३ मात्यजत शद्धायमानैः ३ वशांति शब्द्यंते इति ३ विनाशितं २

सेनान्या ते जगदिरे किंचिदायस्तचेतसा ॥७॥ मा विहासिष्ट समरं समरं तव्यसंयतः न्नतं न्नतं न्तुमा

सुरगणेरगणेरिव किं यशः ॥ अन्ता हि यमकं ॥ विवस्वदंशसंश्लेषद्विगुणीकृततेजसः ॥ अमी वो मोघ

मुद्गीर्णा हसंतीव महासयः ॥८॥ वनेवनेवनसदां मार्गं मार्गमुपेयुषाम् ॥ वालैर्वालैः सहाशंकं शंके

शंकेन शाम्यति ॥१०॥ पातितोत्तुंगमाहात्म्यैः संहृता पतकीर्तिभिः ॥ गुर्वीकामापदं हंतुं कृतमावृत्ति

साहसं ॥११॥ नासुरोयं न वा नागो धरसंस्थो न राक्षसः ॥ नासुखो यं नवाभोगो धरणिस्थो हि राज

सः ॥१२॥ गोमूत्रिकाबंधः ॥ मंदमस्यन्निषुलतां घृणया मुनिरेषवः ॥ प्रार्थयत्यागतानावज्जघने बुप

सूनिव ॥१३॥ न नोननुन्नो नुन्नोनो नाना नानानना ननु ॥ नुन्नोनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत्

॥१४॥ एकाक्षरं जनं ॥ वरं कृतध्वस्तगुणादत्यंतमगुणः पुमान् प्रकृत्या त्यमणिः श्रेयान्नालं

नवा भो गोऽभिनव १४ तो महोत्साहः इत्यर्थः । आभोगो व ... ःगणाः नतु इति प्रश्ने ... अनेन हीनेन जितः ... नापुरुष ... सः ना ४ ... पुरुषतले ... नान्त्यर्थः नथानुन्नो ना ना ... निरो ... पोर पीडि ... ः ४ ... योग्गुणाप्रधानः ५ ... ना: हीनाः पेन सोपि पुरुष ... अपुरुषपुरुषो हीनः

एव नाकारः ३ एवंतसंस्था ५५ कारो यस्य स ५ किरा० ६५ विकाशिता ३ पलायने दूरी कृतः ४ पातिते भ्रंशितं ... माहात्म्यं अनु भावो ये ... किं च नु ... नः सनभ ... भोना नानुन्ना ... पुरुषो नतसि

इसमनंतयसंय तः ६ संकुचितामहा कीर्तिर्ये ः ३ म लं वह्नि ४ भवद्भिः को आपदं हंतुं आवि शिसाहसं ... पराक्रमं कृतं ४ आविर्भिपुरुष ... रामः ६५ ... नानुन्नोः नुन्नो

स्पंदना इति। स्पंदंते प्रद्रवंतीति स्पंदनाः जवनाः॥ रथाः नो संति। चतुरंगच्छतीति चतुरगाः अश्वाः नो संति। सुरेभा ऐरावणाः वृहत्गाः सुरेभाः सुनगजाश्च नो संति। अविपत्तयो विपत्तिरहिता। विपत्तयो विशिष्टाः पदातयो नो संति। अतो भवेत व्यमिति भावः॥ १॥ किंता कुत्सातया उपलक्षिताः संतः ३ प्रश्ने किंनशब्द तनुरसो ती तितनु वान तिनवृत्ति भासत इति तनुवारभसः ७ भास्वान् तेजस्वी ७ अविवले नो न्नतेन ऊनसा ऽपलन्धितः ८ एवं विशेऽस्याधीनः

कारश्चुनोपलः ॥ १५ ॥ स्पंदनानोचतुरगाः सुरेभावाविपत्तयः ॥ स्पन्दनानोचतुरगाः सुरेभावाविपत्तयः ॥
१६ ॥ समुद्गयमकं ॥ भवद्भिरघुनारातिपरिहापितपौरुषैः ॥ ह्रदैरिवार्कनिःपीतैः प्राप्तःपंकोद्धृतैरः ॥ १७
॥ वेत्रशाककुजे शैले लेशैजे कुंकशांत्रवे ॥ यातकिंविदिशाजेतुंतुंजेशादिविकिंतया ॥ १८ ॥ अर्द्धप्रतिलो
मः ॥ अयंवः क्लैब्यमापन्नान्दृष्टपृष्ठानरातिना ॥ वांछतीशश्च्युताचारान्दारानिवनिगोपितुं ॥ १९ ॥ ननुहो
मथनाराघोघोरानाथमहोननु ॥ तयदातवदाभीमामाभीदावतदायत ॥ २० प्रतिलोमानुलोमार्द्धः ॥ किं
त्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः ॥ ज्वलितान्यगुणैर्गुर्वीस्थितातेजसिमानिता ॥ २१ ॥ निशितासि
रतोभीकोन्येजतेमरणारुचा ॥ सारतोनविरोधीनस्वाभासोभरवानुत ॥ २२ ॥ ननुवारभसोभास्वानधी
रोविनतोरसा ॥ चारुतारमतेजन्येकोभीतोरसिताशिनि ॥ २३ प्रतिलोमानुलोमश्लोकद्वयं ॥ निर्भि

मं प्रतिशत्रूनते मथ्यना: विलोडना: कस्मात्‌ राघ: राघृत्वात्‌ सामर्थ्य। राघंते सामर्थ्यं भजंते इति क्विप् लोपः। राघ: सामर्थ्यात्‌॥ ४॥ नाथ महंति तेनाथम
हः। महे अराऽनुत्तरा: अयं ते रक्षंते: तेनया वृति शत्रूणां वलं विद्रावितानः ववदइति खेदे ह्युं कथं न युद्ध्यत पुनरावर्त्तेन नत्यर्थः॥ ४॥ शरसं जत्ता नां माभी
दा छंदति तेमाभीदा: ४ इति विवन्दितत्वात्‌ कृत्तेरीकः वंदंतीति वदाः सत्वप्रतिष्ठा स्तो वा छंदः समासस्तत्र दानवदाः॥ ४॥ मानिता शूरत्वाभिमानिता कि मि

वेत्राणि वंशाः कुले न्यो वा शाका वस्त्रा श्च कुंजा वृक्षा यस्मिन् सः ३ अलेशेन स्तोकेनापि जते कंपते अत्यंतकंपर इत्यर्थः ३ कुकुम्या दाने। नकु कति आदत्ते इति अकुकः ग्रहणाः समसमर्थः शात्रवो यस्मिन् अकुकशात्रवे ३ एजृ कंपने त्वट अतोभवद्भिः नो पि स्यात तथैमेव न रक्षितव्यमिति भावः २

होइत्यादाने ४ हे अमरणाम नरा रहिताः। निशितासिरतः तीक्ष्णखड्गरतः अभीको निर्भीकः रुचा तेजसा उपलक्षितः संतः। सुष्ठु आभासत इति स्वाभासो नमराणां यः। भवतां रहिताः भवतः हितुः इदृशो नोऽस्माकं विरोधि शत्रुः सार्वतोवलतो नन्येजते न कंपते न चलतीत्यर्थः २

नृपातिनाशीयनिरुद्धरथवर्त्मनि ॥ हतद्विरदनिर्भूतरुधिरांबुनदाकुले ॥२४॥ देवाकानिनिकावा
देवाहिकास्वस्वकाहिवा ॥ काकारेभभरेकाका निस्वभव्यव्यभस्वनि ॥२५॥ सर्वतोभद्रः ॥ प्रनृ
त्तशववित्रस्ततुरगान्त्रिन्नसारथौ ॥ मारुतापूर्णितूणीरविकुष्टहतसादिनि ॥२६॥ ससत्वरतिदे
नित्यं सदरामर्षनाशिनि ॥ त्वराधिककसन्नादे रमकत्वमकर्षति ॥२७॥ अर्द्धभ्रमकः ॥ आसु
रे लोकवित्रासविधायिनि महाहवे ॥ युष्माभिरुन्नतिं नीतं निरस्तमिह पौरुषं ॥२८॥ एवंभिः कु
लकं ॥ इति शासति सेनान्यां गच्छतस्ताननेकधा ॥ निषिध्य हसता किंचित्तस्थे तत्रांधकारिणा ॥ निरो
धः ॥२९॥ मुनीषुदहनातप्तांल्लज्जया निविवृत्सतः ॥ शिवः प्रह्लादयामास तान्निषेधहिमांबुना ॥३०॥ दूनास्ते रिबलादूना निरेभा वद्रुमेनिरे ॥ भीताः शितशराभीताः शंकरं तत्र शंकरं त्रा

किरा० ६६

ससत्वा नां सत्वव तोरति राग प्रदे नित्यं स दरसांस भयानां आमर्षना शिनि ४

राम ६६

ससत्वा ... (marginal commentary, top): ...पुनश्च देवाकानिनि ... सर्वतोभद्रः ... थै किं मदोदके ...

नरा ... यस्मिन् ... काकाः ... इति ... निरुत्सा हाः ... यस्मिन् १

त्वया उत्साहेन अधिकक संतोषिक ... निमग्ना १ ... तोरु ... किं वा इति ते ४

रता.. स्थितां २ — चंवतः ... ६

घंतयमकं ॥ ३१ ॥ महे षुजलधौ शरोवर्तमानाडुरुत्तरे ॥ घा प्यपारमिवेशानमाशश्वासपताकिना ॥ ३२ ॥ सवभाररणापेतां चमूं पश्चादवस्थितां ॥ पुरः सूर्यादयावृत्तो छायामिव महातरुः ॥ ३३ ॥ मुंचती शेशरान्भिन्नो पिनाकस्वनपूरितः ॥ दध्वान ध्वनयन्नाशाः स्फुरन्निव धराधरः ॥ ३४ ॥ तेगणादद्भुभी मं चित्रसंस्थाइवाचलाः ॥ विस्मयेन तयोर्युद्धं चित्रसंस्थाइवाचलाः ॥ ३५ ॥ परिमोहयमाणेन शिन्नालाघवलील याजैह्मवीवि शिखश्रेणिः परिजह्रे पिनाकिना ॥ ३६ ॥ अवघ्नपूत्रिणाः शंभोः सायकैरवसायकैः ॥ पांडवः परिचक्राम शिन्नपारणा शिन्नया ॥ ३७ ॥ चारचंचुश्चिरारेची चंचच्चीररुचा रुचः ॥ चचार रुचिरः श्चारुचारैराचारचंचुरः ॥ ३८ ॥ स्फुरत्पिंगलमौवीकं धुन्वानः सदहदुनुः ॥ धृतोल्कानलयोगेन तुल्यमंशुमता वभौ ॥ ३९ ॥ पार्थवाणाः पशुपतेरावव्रुर्विशिखावलिं पयोमुच इवारं

युद्धानाते... प्रसिद्धः २
गोमुत्रिकादिवाहुयुद्धचक्रादिवंधेर्वीर
...प्रसिद्धः ३ चित्रं शत्रून् ... करोतिसः ३
शिरोदध्नुः १

शकुमि... विषयाउत्साह विषयया ३ (margin)

अंतकारिमिः ४ (margin)

राकि० ६७

मीयो भार्गनं २ निराघ २ भयंकरा: २ निरस्य महती २ क्षिप्तां २ तानेताआंभीने रासंरावे तान्विहन्ताविशुनयोपयामा ३ अनुकंपकृपांकृतावानव्याप्तेस्मिनेनहन्तीन २

ध्रुवाःसावित्रीमंत्रस्तुसंहतिं ॥४०॥ शरवृष्टिंविधूयोर्वीमुहूर्तात्सव्यसाचिना ॥ क्रूरोधमार्गणौघैर्गतपन स्यत्रिलोचनः ४१ तेनव्याप्तेनिरेभीमाभीमांजनफलाननाः ॥ मनोनुकंप्यविशिखाःशिखाधरज वाससः ॥४२॥ कांचीयमकं ॥ युवियज्ञामिनीतारसंरावविहतंश्रुतिः ॥ हेमीषुमालासुसुभेवि युतामिवसंहतिः ॥४३॥ गूढचतुर्थःपादः ॥ विलंघ्यपत्रिणांपंक्तीर्भिन्नःशिवशिलीमुखैः ॥ ज्यायो वीर्यंसमाश्रित्यनचकंपेकपिध्वजः ॥४४॥ जगतीशरणोयुक्तोहरिकांतःसुधासितः ॥ दानवर्षी कृताशंसोनागराजइवावभौ ॥४५॥ अर्धत्रयवाची ॥ विफलीकृतयत्नस्यक्षतबाणस्यशंभुना ॥ गांडीवधनुषःखेभ्योनिश्चचारहुताशनः ॥४६॥ सपिशंगजटावलिःकिरन्नुरुतेजःपरमे णमन्युना ॥ ज्वलितौषधिजातवेदसाहिमशैलेनसमंविदिद्युते ॥४७॥ शतशोविशिखान

राम ६७

तं इषुं निवारयितुं २ प्रथयन्नसौ दर्शयन्न १ ततो ऽनतदृष्टिलोचनस्याप्रमेयस्य ४

खंडयते १ शोभिभे निजामिति शेष १ अमारकं १

वध्यंते भृशमस्मैरणावेगशालिने ॥ अथ धैर्यमन्न निवार्यवीर्यतां अजिघायेषुमघांतकं शिवः ४८

॥ शंभोर्ईन्नु मंडलतश्च हृन्तं तं मंडलाद्दृशुमिवांशुभर्तुः ॥ निवारयिष्यन्विदधे सिताश्वः शिलीमु

खच्छायवृतां धरित्रीं ॥४९॥ घनं विदार्यार्जुनबाणपूगं ससारबाणोयुगलोचनस्य ॥ घनं वि

दार्यार्जुनबाणपूगं ससारबाणोयुगलोचनस्य ॥५०॥ समुद्दकं ॥ रुजन्हरेषून्मुहुरुग्रशुपा

तिनो मुहुः शरौघैरपवारयन्दिशः ॥ चलाचलोऽनेक इव क्रियावशान्महर्षिसंघैर्बुबुधे ध

नंजयः ॥५१॥ विकाशमीयुर्जगतीशमार्गणाः विकाशमीयुर्जगतीशमार्गणाः ॥ विका

शमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ॥५२॥ संपश्यतामिति शि

वेन वितायमानं लक्ष्मीवतः क्षितिपतेस्तनयस्य वीर्यं ॥ अंगान्यभिन्नमपि तत्त्वविदां मुनी

विविक्षेत्यर्थः ४ आकाशप्राप्तन ४ विकाशमिति। जगतीशस्य पृथ्वीपतेरर्जुनस्य मार्गणाः विक्षिप्त्वा विकाशं विस्तारं ईयुः तदा अशमारोरं...

शिलीमुखानां छायाः इति शिलीमुखच्छायातेन २ तां २

हृदयेश ४ क्रियालाघववशात् अनेक इव ४

गतिलोके इह मार्गणाः शंभुबाणाः विकाशं विशमगतिमीयुः तदा नीजगती संप्रति सोत्तरक नरोग। एवं भूतान्दसाः। तान्समोरयंती तिजगती

प्राः। तेच मार्गणाः विकाशं उत्साह समीपुः। अहो इव परिक्रमप्रास्तदृशीतिविस्मया दिभावः। तदा नी मार्गणं ... मार्गणाः। जगतीशस्य त्रैलोक्य

नाथस्य मार्गणाः ... जगतीश मार्गणाः शिवदृष्टा ... विकाशं का शमीपुः ... तिभावः ३

कारणानि रणमेरकारणानि विवि ४ ... कवीन्द्र २ स्वन्विमृ ... ३
आक्षिपंतः प्रतिषेधंत इव स्थिताः ३ प्रवृद्धकोपः २ अभ्युहितवान् २

विक्रांताः परा
क्रमे कुर्वंतः २

किरा०
६८

सहिष्णवो रणा
क्षमाः युद्धमा
र्गेऽभिज्ञाः शि
क्षिता इत्यर्थः
४

नांरोमांचमंचिततनुंविभरांबभूवुः ॥ ५३ ॥ इति किरातार्जुनीये महाकाव्ये भारविकृतौ लक्ष्म्यंके पंचद
श सर्गः ॥ ततः किराताधिपतेरलघ्वीमाजिक्रियां वीक्ष्य विवृद्धमन्युः ॥ सतर्कयामास विविक्ततर्क
श्चिरं विचिन्वन्निति कारणानि ॥ १ ॥ मदस्रुतिश्यामितगंडलेखाः क्रामंति विक्रांतनराधिरूढाः ॥ स
हिष्णवो नेह युधामभिज्ञा नागा नगोच्छ्रायमिवाक्षिपंतः ॥ २ ॥ विचित्रया चित्रयतेव भिन्नां रुचं र
वेः केतनरत्नभासा ॥ महारथौघेन न संनिरुद्धा पयोदमंद्रध्वनिना धरित्री ॥ ३ ॥ समुल्लसत्प्रास
महोर्मिमालमभिस्फुरच्चामरफेनपंक्ति ॥ विभिन्नमर्यादमिहातनोति नाश्वीयमाशा जलधे
रिवांभः ॥ ४ ॥ हताहतेत्युद्धतभीमघोषैः समुज्झिता योद्धृभिरभ्यमित्रं ॥ न हेतयः प्राप्ततडित्त्विषः
खे विवस्वदंशुज्वलिताः पतंति ॥ ५ ॥ अत्यायतं संततधूम्रमब्यापिशंगभाजालमिवांतकस्य ॥ रजः

विवीतो निः
केतनकः तर्क
कृद्ज्ञानयस्य
सः २

राम
६८

न संनिरुद्धा नाश्वाः धूमर नातनोति माहस्रोतिर

प्रवृत्तणिश्वरथांगनुन्नंतनोतिनव्योमनिमातरिश्वा ॥ ६ ॥ मूरेणनाराससमधूसरेणांतिरोहितेवर्त्मनिलोचना
नां ॥ नास्त्यत्रतेजस्विभिरुत्सुकानामङ्घ्रिप्रहोषः स्मरसंतुदरीणां ॥ ७ ॥ रथांगसंक्रीडितमश्वहेषाबृंहतिमत्तद्वि
पद्वृंहितानि ॥ संहर्षयोगादिवमूर्छितानिह्लादंनिगूहंतिनदुंदुभीनां ॥ ८ ॥ अस्मिन्यशःपौरुषलोलुपानाम
रातिभिःप्रत्युरसंहतानां ॥ मूर्छीतरायंमुहुराछिनत्तिनासारशीतंकरिसीकरांभः ॥ ९ ॥ असंस्रदीनामुपची
यमानैर्निरोधयद्भिःपदवींध्वजिन्याः ॥ उद्धूयमानापितिनशोणितौघैःपंकैरिवाश्यानघनैस्तटानि ॥ १० ॥ परि
क्षतेवक्षसिदंतिदंतैःप्रियांकशीतानभसःपतंती ॥ नेहप्रमोहंप्रियसाहसानांमंदारमालाविरलीकरोति ॥
११ ॥ निषादिसन्नाहमणिप्रभौघेपरीयमाणेकरिशीकरेण ॥ अर्कत्विषोन्मीलितमभ्युदेतिनखंडमाखं
डलकार्मुकस्य ॥ १२ ॥ महीभृतापक्षवतेवभिन्नाविगात्यमध्यंपरवारणेन ॥ नावर्त्तमानानिनदंतिभीमम

न्न्यायुधविशेषस्य२

नेर

वेगः यथास्यात्१

पांनिधेरापद्इवघ्नजिन्यः ॥ १३ ॥ महारयानांप्रतिदंत्यनीकमधिस्यदस्यंदनमुत्थितानां ॥ आमूललूनैरति
मन्युनेवमातंगहस्तैर्द्रियते नपंथाः ॥ १४ ॥ घृतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः
नवर्हभारः पतितस्य शंकोर्निषादिवक्षःस्थलमाततोनि ॥ १५ ॥ उन्नन्त्तदंसंहारइवोऽस्तसंरब्धमङ्कापयतेजसस्वि
षुजीवितानि ॥ लोकत्रयास्वादनलोलजिह्वं व्यादद्दात्पाननमत्रमृत्युः ॥ १६ ॥ इ पंचडुर्वारमहारयानामा
क्षिप्यवीर्यमहतो वलानां ॥ शक्तिर्ममावश्यतिहीनयुद्धेः सौरीवताराविपथाम्रिदीप्तिः ॥ १७ ॥ कुलकं ॥ मा
यास्विदेषामतिविभ्रमोनुध्वस्तंनुमेवावीर्यमुताहमन्यः ॥ गांडीवमुक्ताहि यथापुरामेपराक्रमंतेन शराः
किराते ॥ १८ ॥ पुंसः पदंमध्यममुत्तमस्यद्विधेवकुर्वनधनुषः प्रणादैः ॥ नूनंतथानैषयथास्यवेषः प्रच्छं
न्नमप्यूहयतेहिचेष्टा ॥ १९ ॥ धनुःप्रबंधध्वस्तनितांतरूपैवसमन्द्दिक्रष्टाविततेवमौर्वी ॥ संधानमुत्कर्षमिवव्यु

श्रीघ्रं३

राम

६५

हिनाभवति४

सौष्ठवेनसहवर्त्ततेससौष्ठवः ३ अस्येतिसेषः १ चित्तैकाग्र्यं १ ग्रीवायाः १ युद्धमार्गेशास्त्रक्रमेणागतेषुप्राप्तेषु २ स्थिरतया २

दस्यमुष्टेरसंभेदइवापवर्गे ॥ २० ॥ अमाववष्टंभनतौ समाधिःशिरोधरायाररहितप्रयासः ॥ धृताविकारांस्त्यज
तामुखेनप्रसादलक्ष्मीःशशलांछनस्य ॥ २१ ॥ (नचलति) प्रहीयतेकार्यवशागतेषुस्थानेषुविष्टब्धतयानदेहः ॥ स्थित
प्रयातेषुससौष्ठवश्चलक्ष्येषुपातःसहशाःशराणां ॥ २२ ॥ परस्यभूयाद्विवरेभियोगःप्रसह्यसंरक्षणमात्म
रंध्रे ॥ भीष्मेप्यसंभाव्यमिदंगुरौवानसंभवत्येववनेचरेषु ॥ २३ ॥ कुलकं ॥ अप्राकृतस्याहवदुर्मदस्यनिवार्य
मस्यास्त्रबलेनवीर्यं ॥ अल्पीयसोप्यामयतुल्यवृत्तेर्महापकाराहि रिपोर्विवृद्धिः ॥ २४ ॥ ससंप्रधार्यैवमहा
र्यसारःसारंविनेष्यन्सगणस्यशत्रोः ॥ प्रस्वापनास्त्रंद्रुतमाजहारध्वांतंघनानद्धइवार्द्धरात्रः ॥ २५ ॥ प्रसक्तदा
वानलधूमधूम्रानिरुंधतीधाममसह्यरश्मेः ॥ महावनानीवनिशातमिस्राछायातताने शबलानिकाली
॥ २६ ॥ आसादितातत्प्रथमंप्रसह्यप्रगल्भतायाःपदवीहरंती ॥ सभैवभीमाविदधेगणानांनिद्रानिरा

अस्यकिरातस्य देहः २

प्रस्वापयतेऽनेनेतिप्रस्वापनंनिद्राकारकमित्यर्थः ३ विक्षेपप्राप्तिपर

ज्ञा१

किरा०

संप्रति भासुराणस्य ॥२७॥ गुरूस्थिराण्युत्तमवंशजत्वाद्वि[illegible]तसाराण्यनुशीलनेन ॥ केचित्समाश्रित्य गुणान
तानि सुहृत्कुलानीव धनूंषि तस्थुः ॥२८॥ कृतांतदुर्वृत्त इवापरेषां पुरःप्रतिद्वंद्विनि पाडवास्त्रे ॥ अतर्कितं पा
णितलान्निपेतुः क्रियफलानीव तदायुधानि ॥२९॥ अंसस्थलैः केचिदभिन्नधैर्याः स्कंधेषु संश्लेषवतां तरू
णां ॥ मदेन मीलन्नयना सलीलं नागा इव स्रस्तकरा निषेदुः ॥३०॥ तिरोहितेन्द्रोरथ शंभुमूर्ध्नः प्रणाम्यमा
नेन तपस्यांति वासैः ॥ समेरुपादिव दिविमांकपिशंगमुच्चैरुदीयायत तेजः ॥३१॥ छायां विनिर्धूय तमोमयीं तां
तत्त्वस्य संविद्भिरिवापविघ्नां ययौ विकाशं द्युतिरिंदुमौलेः ॥ आलोकमभ्यापहिशंती गणौघ्यः ॥३२॥ त्विषां ततिः
पाटलितांबुवाहा सा सर्वतः पूर्वसरीव संध्या ॥ निनाय्यते षां द्रुतमुल्लसंती विनिद्रतां लोचनपंकजानि ॥३३॥ राम
पृथग्विधान्यस्त्रविरामबुद्धाः शस्त्राणि भूयः प्रतिपेदिरे ते ॥ मुक्ताः [illegible] वितानेन नवत्नाहकानां ज्योतींषि रम्या

७०

70

ज्ञानंद्र

७०

दूवं हि दिग्विभागाः ॥ २४ ॥ घोरोरुन्ननामैव दिशः प्रसेदुः स्फुरं प्रसस्ते सविन्तुः मयुखैः ॥ कृयंगतायामिवयाम

वत्यां पुनः समीपायदिने दिनश्रीः ॥ २५ ॥ महाहवदुर्गे शिथिलप्रयत्नैर्दिग्वारणैर्नैव परेण भुग्ने ॥ भुजंगमा

स्त्रभुजवीर्यशाली निर्वेष्टनाय प्रजिह्वाय जिह्मुः जिह्वाशतान्फुल्लयंस्तप्रज[illegible]लसत्तडिल्लोलविषानला

जं ४.

नि ॥ त्रासान्निरस्तां मुद्गेंदुसेनां नभश्चरैः सात्यद्दंवी विवव्रे ॥ २६ ॥ दिग्नागहस्ताकृतिमुद्धहद्भिर्भोगैः प्रशस्तासि

तरत्ननीलैः ॥ रराजसर्पावलिरुल्लसंती तरंगमाले वनभोगिवस्य ॥ २७ ॥ निश्वासधूमैः स्थगितांशुजालैः फणा

वतामुत्फणमंडलानां ॥ गच्छन्निर्वांस्तवपुरं प्रभुवाह विलोचनानां सुखमुष्मरश्मिः ॥ २८ ॥ प्रतप्तचामीकरभा

स्वरेण दिशः प्रकाशेन पिशंगयंत्यः ॥ निश्चक्रमुः प्राणहरेक्षणानां ज्वालामहोल्का इव लोचनेभ्यः ॥ २९ ॥ आ

क्षिप्तसंपातमपेतशोभमुद्दह्रिधूमाकुलदिग्विभागं ॥ वृत्तं नभो भोगिवल्लैरवस्थापरोपरुद्धसंपुरस्पभे

स्तं २

आक्षिप्तः संपातः जामनं प्रस्मितत

किरा०

७१

जे ४० ॥ तं मास्तुचक्षुः श्रवसां समूहं मत्वेन्द्रणेतार्ध्योदयकारणेन ॥ नेत्तानयेनेवपरो पजायं निवारयामास प
तिःपसूनां ॥ ४१ ॥ प्रतिघ्नतीभिः कृतमीलितानि द्युलोकभाजामपि लोचनानि ॥ गरुत्मतां संहतिभिर्विहायः
क्षणप्रकाशाभिरिवावितेने ॥ ४२ ॥ ततः स्तुपर्णाब्रजपक्ष जन्मा नानागतिर्मण्डलयज्जवेन ॥ जरत्तृणानी
व वियन्निनाय वनस्पतीनां गहनानि वायुः ॥ ४३ ॥ मनःशिलाभंगनिभेन पश्चान्निरुध्यमानं निकरेण भासां
॥ व्यूढैरुरोभिश्च विनुद्यमानं नभःससर्पेव पुरः खगानां ॥ ४४ ॥ दरीमुखैरासवरागताम्रं विकासिरुक्मच्छ
दधाम पीत्वा ॥ जवानिलाघूर्णितसानुजालो हिमाचलः क्षीबइवाचकंपे ॥ ४५ ॥ प्रवृत्तनक्तं दिवसंधिदीप्तै
नभस्तलं गां च पिशंगयद्भिः ॥ अन्तर्हितार्कैः परितः पतद्भिः छायाः समाचिक्षिपिरे वनानां ॥ ४६ ॥ सभोगिसं
वंः समसमुग्रधाम्नां सैन्येन निन्ये विनतासुतानां ॥ महाध्वरे विध्यपचारदोषः कर्मान्तरेणेव महोदयेन ॥ ४७

राम

७१

साफल्यमस्त्रैरिपुपौरुषस्य कृत्वागतैर्भागपदैर्वापवर्गं ॥ अनिंधनस्य प्रसभं समन्तुः समाददैस्त्रैर्ज्वलनस्य जि
ह्मुः ॥ ४८ ॥ ऊर्ध्वैस्तिरश्चीनमधश्च कीर्णैर्ज्वालासटैर्ल्लिखितमेघपंक्तिः ॥ आयस्तसिंहाकृतिरुत्पपात शाखापतंमिछ
न्निवजातवेदाः ॥ ४९ ॥ भिन्नैर्वभाभिः सवितुर्मयूषान्नूजज्वाल चित्रं त्विमृतस्फुलिंगः । विशीर्यमाणाश्मनिना
दभीमं धनिं चितत्वन्नकृशः कृशानुः ॥ ५० ॥ चयानिवीडीनिवहुगान [illegible] क्वचित्सुराणीवहिरण्मयानि ॥ महावना
नीवच किंशुकानांनतानवह्निः पवनानुवृत्या ॥ ५१ ॥ मुहुर्मुहुः स्खलत्पल्लवलोहिताभिः रुद्धैः शिखाभिः शिखिनो
वलीढाः ॥ तलेषु मुक्ताविशदाबभूवुः सांद्राञ्जनश्यामरुचः पयोदाः ॥ ५२ ॥ लिलिक्षुनीव क्षयकालरौद्रैर्लोकं वि
लोलार्चिषि [illegible] हिताक्ष्णापिनाकिना तूतमहांबुवाहमस्त्रेपुरः पाशभृतः प्रणिन्ये ॥ ५३ ॥ ततोधरित्रीधरतुल्यरो
धसः स्तडिल्लतालिंगितलोलमूर्तयः ॥ अथोमुखाकाशसरिन्निपातिनीरयः प्रसक्तं मुमुचुः पयोमुचः ॥ ५४ ॥ प

राहतध्वस्तशिखैःशिखावतोवतस्थेविह्निप्रसमर्द्दितेजसि॥ कृतास्पदास्तप्तइवायसिध्वनिंपयोनिपाताःप्रथमे
विते निरे॥५५॥ महानलैर्भिन्नसिताभ्रपातिभिःसमेत्यसद्यःक्वथनेनफेनतां॥ व्रजद्भिरादेन्धनवत्परिक्षयंजलै
र्वितेनेहिविधूमसंततिः॥५६॥ स्वकेतुभिःपांडुविनीलपाटलैःसमागताःशक्रधनुःप्रभाभिदः॥ असंस्कृतामाद
धिरे विभावसोर्विचित्रचीनांशुकचारुतांत्विषः॥५७॥ जलौघसंमूर्छनमूर्छितस्वनःप्रसक्तविद्युल्लसितैधितद्यु
तिः॥ प्रशांतिमेष्यन्धृतधूममंडलोवभूवभूयानिवतत्रपावकः॥५८॥ प्रवृद्धसिंधूर्मिचयस्थवीयसांचयैर्विभिन्नाः
पयसांप्रपेदिरे॥ उपात्तसंध्यारुचिभिःसरूपतांपयोदविच्छेदलवैःकृशानवः॥५९॥ उपेत्यसंन्नद्युतिरप्यसंशयंवि
भिन्नमूलोनुदयायसंक्षयं॥ नयत्याहितोपोद्यविनिन्यसंहतिःसहस्रवाहःप्रययौपराभवं॥६०॥ अथविहितवि
धेयैराशुमुक्ताविताबैरसितनगनितंवश्यामभासांघनानां॥ विकसदमलधाम्नांप्रापनीलोत्पलानांश्रि

यमषिकविस्फुलिङ्गंवङ्क्तिसहाहिवंघोः॥ ६१ ॥ इतिविविधमुदासेसव्यसाचीयदस्त्रंवऊसमरनयज्ञःसाद्दयिष्यन्नरा
तिं॥विधिरिवविपरीतःपौरुषंन्यायवृत्तेःसपदिशितदुपनिन्येरिक्ततांनीलकंठः॥ ६२ ॥ वीतप्रभावतनुरप्यतनुप्रभा
वःप्रत्या[illegible]चकांक्षजयिनीभुजवीर्यलक्ष्मीः॥ अस्त्रेषुभूतपतिनापहृतेषुजिष्णुर्वर्षिष्यतादिनकृतेवजले
षुलोकः॥ ६३ ॥ ॥ इतिश्रीकिरातार्जुनीयेमहाकाव्येश्रीमद्भारविकृतौलक्ष्म्यङ्केअस्त्रपुह्लोनामषो
डषसर्गः॥ ॥ अथापदामुद्धरणक्षमेषुमित्रेष्विवास्त्रेषुतिरोहितेषु॥ धृतिंगुरुश्रीर्गुरुणाभिपुष्यन्स्वपौ
रुषेणेवशरासनेन॥ १ ॥ भूरिप्रभावेनरणाभियोगात्प्रीतोविजिह्मश्रुतदीपवृध्या॥ स्पष्टोप्यविस्पष्टवपुःप्र
काशःसर्पन्महाधूमइवद्विवह्निः॥ २ ॥ तेजःसमाश्रित्यपरैरहार्यंनिजंमहन्मित्रमिवोरुधैर्यं॥ आसादयन्नस्
खलितप्रभावोभीमेभुजालम्बमिवारिदुर्गे॥ ३ ॥ वंशोचितत्वादभिमानवत्यासंप्राप्तयासंप्रियतामसुभ्यः॥

समक्रूमाहित्सिनयापरेणावधूतेव कीर्त्यापरितप्यमानः ॥४॥ पतिं नगानामिव बद्धमूलमुन्मूलयिष्यंस्तरसा
विपक्षं ॥ लघुप्रयत्नं निगृहीतवीर्यस्त्रिमार्गगावेग इवेश्वरेण ॥५॥ संस्कारवत्त्वाद्रमयत्सु चेतः प्रयोगशिक्षा
गुणभूषणेषु ॥ जयं जयार्थेषु शरेषु पार्थः शशंस भावार्थमिवाशसंसे ॥६॥ कुलकं ॥ भूयः समाधनविवृद्ध
तेजाः नैवं पुरा युद्धमिति व्यथावान् ॥ स निर्ववामास्त्रममर्षनुन्नं विषं महानाग इवेणाभ्यां ॥७॥ तस्याहवायासवि
लोलमौलेः संरम्भताम्रायतलोचनस्य । निर्वापयिष्यन्निव रोषतप्तं प्रस्नापयामास मुखं निदाघः ॥८॥ क्रोधांध
धकारांतरितो रणाय भ्रूभंगलेखाः स बभार तिस्रः ॥ घनोपरुद्धः प्रभवाय वृष्टेरूर्ध्वांशुराजीरिव बिम्बमर्कः ॥९॥
सप्रध्वनत्यांबुदनादि चापं हस्तेन दिग्नाग इवाद्रिशृंगं ॥ बलानि शंभोरिषुभिस्तताप चेतांसि चिंताभिरिवाश
रीरः ॥१०॥ सद्याहिते वाभिनिविष्टबुद्धौ गुणाभ्यसूयेव विपक्षपाते ॥ अगोचरे वागिव चोपरेमे शक्तिः शरा

णां सितकंठकायै ॥ ११ ॥ उमापतिं पांडुसुतप्रणुन्नाः शिलीमुखा नव्यपायां बभूवुः ॥ मध्ये स्थितस्योस्तमतां समू
हमर्कस्य पादाइव हैमनस्य ॥ १२ ॥ संक्षीयमाणो ऽनुबभूव तीव्रं पराक्रमे तस्य पतिर्गणानां । विषाणभेदं हिमवान्
सतेयं वप्रानतस्येव सुरद्विपस्य ॥ १३ ॥ तस्मै हि भारो द्रुहणो समर्थं प्रहास्यतां वाङ्मिव प्रतापं । चिरं विषेहे भिभव
स्तदानीं सकारणानामपि कारणेन ॥ १४ ॥ इत्याह तं तोजाः कृतसत्ववेगः पराक्रमं ज्यायसि यस्तनोति । ते
जांसि भानोरिव निष्पतंति यसासिवीर्यं ज्वलितानि तस्य ॥ १५ ॥ दृष्टावदानाघ्यतैरिलोकैः प्रवृद्धं सममेति व्या
प्तितान्वितेजः ॥ तेजोविहीनं विजहाति दर्पः शांतार्चिर्वहिमिव प्रकाशः ॥ १६ ॥ ततः प्रयातस्य स्त मस्त्रावलेपः सं
जय्यतायाः पदवीं जिगीषा ॥ गंधेन जेतुं प्रमुखागतस्य गंधद्विपस्येव मतंगजो ऽष्टः ॥ १७ ॥ एवं प्रतिद्वंद्विषु
तस्य कीर्तिमौली दुल्लेखाविशदां विधास्यन् ॥ इयेष पर्यायपजयावसादं रणक्रियां शंभुरनुक्रमेण ॥ १८ ॥

किरा०
७४
74

त्रिभिर्विशेषकं॥ मुनेर्विचित्रैरिषुभिः स भूयो निन्ये वशं भूतपतेर्बलौघः। सहात्मलाभेन समुत्पतद्भिर्जातिस्वभा
वैरिव जीवलोकः॥१९॥ वितन्वतस्तस्य शरांधकारं त्रस्तानि सेन्यानि रवं निशेमुः॥ प्रवर्षतः संततवेपथूनि क्ष
पाघनस्येव गवां कुलानि॥२०॥ समायकान्साधुसविक्लवानां क्षिपन्परेषामतिसौ ष्ठवेन॥ शशीव दोषा
वृतलोचनानां विभिद्यमानः पृथगाबभासे॥२१॥ क्षोभेण तेनाथ गणाधिपानां भेदं ययावाकृतिरीश्वरस्य
॥ तरंगकंपेन महाह्रदानां छायामयस्येव दिनस्य भर्तुः॥२२॥ प्रसेदिवांसं न तमाप कोपः कुतः परस्मि न्पु
रुषे रजो वा॥ आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृत्तिः॥२३॥ विस्फार्यमाणस्य ततो भुजाभ्यां
भूतानि भर्त्रा धनुरंतकस्य भिन्नाकृतिं ज्यां ददृशुः स्फुरंतीं क्रुद्धस्य जिह्वामिव तक्षकस्य॥२४॥ स प्राप सव्यापसव्यध्वनि
तोग्रचापं पार्थः किराताधिपमाशशंके॥ वैषम्यसंपादितकर्णतालं यंता गजं व्यालमिवापराद्धः॥२५॥ निज

राम
७४

ध्वनैश्चास्य हरेषु जालैः पतंति वृंदानि शिलीमुखानां ॥ उज्जह्रिरे भिः सिद्धमुखागतानि याद्दांसि याद्दोभिरिवार्णो

वस्य ॥ २६ ॥ विभेद मंतः परवाहिनीरोधं विद्धं सनैर्वाचि विद्दितप्रयोगः ॥ नेतारि लोकेषु करोति यद्यन्नत्वकारं स्य शरेषु

रांसुः ॥ २७ ॥ सोढावगीतं प्रथमं यया पुष्पस्य कोधोकितैर्वेगितया पतद्भिः ॥ छिन्नैरपि त्रासितवाहिनीकैः पेते कृतार्थैः

रिव तस्य बाणैः ॥ २८ ॥ अलंकृतानां मृजुतागुणेन गुरूपदिष्टांगतिमाश्रितानां ॥ सतामिवापर्वणि मार्गणानां

भंगः स जिह्मैर्विदधे मुन्ममाथ ॥ २९ ॥ बाणान्छिद्दस्ते विशिखास्य मरोर्खा ज्ञुखीभूतफलाः पतंतः ॥ अखंडितं यां

डवसायकेभ्यः कृतस्य सद्यः प्रतिकारमीयुः ॥ ३० ॥ छित्रीयमाणान्नितिलांबुवेन प्रमाथिनस्तानुभवमार्गणाना

नां ॥ शोकाकुलाया निचखान दूरं गाणा[illegible] ध्वजिन्या हृदये शरानिः ॥ ३१ ॥ तस्यांतिपत्नाईतिरिच्यमाने पर

क्रमैन्योन्यविशेषणेन ॥ हंता पुरो भूरिष्टपत्कवर्षैर्निरासमैनेराद्धमिवांबुमेद्यः ॥ ३२ ॥ अनास्त्रशेतः कृवि

किरा०
७५
75

देवमर्म्मछिद्रिये पिराणांनुग्रहिताः शिवेन ॥ स्रुतत्वयुक्तांड्वनर्मवाद्यः शरासुनेःशीतिकरावभूवुः ॥ ३३ ॥
अस्त्रैः समानामतिरेकिणीं वा पश्यन्निषूणां मपितस्य शक्तिं ॥ विषादवक्तव्यबलः क्षमाध्रीस्वमालवलंवेवलं
सिंदुमौलिः ॥ ३४ ॥ ततस्तपोवीर्यसमुद्धतस्य पारंयियासोः समराणीवस्य ॥ महेषुजालान्यखिलानि जि
ष्णोरर्कैः पयांसीव समाचचाम ॥ ३५ ॥ रिक्ते सविस्मयमथार्जुनस्य निषंगवक्त्रे निपपात पाणिः ॥ अन्य
द्विपापीतजले सतर्षमतंगजस्येव नगाश्मरं ध्रे ॥ ३६ ॥ च्युते सजत्तस्मिन्निषुधौ शरार्थातत्वस्तां यथा रसह
सवंधौ ॥ तत्कालमोघप्रनयः प्रपेदे निर्वाच्यतां कामइवाभिमुख्यं ॥ ३७ ॥ अघद्दयामास गतागतानां भंसावेग
मग्रांगुलिरस्यतूणौ । विधेयमार्गेमतितिरुत्सुकस्यनयप्रयोगाविवगां जिगीषोः ॥ ३८ ॥ वभार शून्याकृति
रर्जुनस्तौ महेषुधीवीतमहेषुजालौ ॥ युगांतसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवांबुराशी ॥ ३९

राम
७५

तेनानिमित्तेनतथानपार्थस्तपोर्यथारिक्ततयानुतेपे ॥ स्वामापदं शोच्यविपत्तिमग्नं शोचंतिसंतोह्युपका

रिपक्षं ॥ ४० ॥ इतिक्रियार्थैर्विधुरःसतस्मात्कृच्छ्रेणविश्लेषमवापहस्तः ॥ पराङ्मुखत्वेपिकृतोपकाराद्ग्रणीमु

खान्मित्रकुलाद्विवार्थी ॥ ४१ ॥ पश्चात्क्रियात्तूणयुगस्यभर्तुर्जज्ञेतदानीमुपकारिणीव ॥ संभावनायांविफला

कृतायांपतत्सुःपुरःसाहसमासितव्यं ॥ ४१ ॥ तंशंभुरांक्षिप्तमहेषुजालंलोहैःशरैर्मर्मसुनिस्तुतोद ॥ ततोंतरं

तत्वविचारणायांवादीवहीषैःगुरुभिर्विपक्षं ॥ ४२ ॥ जहारचास्माद्विचिरेणवर्मज्वलन्मणिद्योतितहेमलेखं ॥ चंडः

पतंगान्मरुदेकनीलंतडित्वतःखंडमिवांबुदस्य ॥ ४३ ॥ विकोशनिर्धौततनोर्महासेःफणावतस्त्वचिविच्युता(

यां ॥ इतिद्विपावद्दरुषःसमक्षंनागस्यचांक्षिप्तमुखच्छदस्य ॥ ४४ ॥ विवोधितस्यध्वनिनाघनानांहरेरपेतस्यच

शैलरंध्रान् ॥ निरस्तधूमस्यचरात्रिवह्नेर्विनातनुत्रेणरुचिंसलेभे ॥ ४५ ॥ युग्मं ॥ अचिन्नतायामपिनामयुक्तामं

नूर्ध्वं तां प्राप्य तदीयकृत्ये ॥ महीगतौ ताविषुधी तदानीं विवव्रतुश्चैतनयेववयोगं ॥४६॥ स्थितं विशुद्धे नभसीव
सत्त्वे धाम्नात पोवीर्यमयेन युक्तं । शस्त्राभिघातैस्तमजस्रमीशस्त्वष्टा विवस्वन्तमिवोल्लिलेख ॥४७॥ संरंभवे
गो[illegible]वेदनेषु गात्रेषु बाधिर्यमुपागतेषु ॥ बभूव तस्या गतिनाहितेषोर्लौहस्तिरस्कार इवात्ममन्युः ॥४८
ततोऽनुपूर्वायतवृत्तबाहुः श्रीमाननूद्रुहल्लोहितधातुदिग्धः ॥ आस्कन्धवेगेन विमुक्तनादः क्षितिं विधुन्वन्नि
व पार्ष्णिघातैः ॥४९॥ सास्यगतेनाशनिनामध्वानः शशांकलेखाकृतिपाण्डुरेण ॥ शृंखं विभित्सुर्वपुषा जघ्ने
नस्तंभं विषाणेन महानिवेभः ॥५०॥ युग्मं ॥ रयेण सा सन्निदधे पतंती भवोद्भवेनात्मनि चापयष्टिः ॥ ससुद्भूता
सिंधुरनेकमार्गा परि[illegible]तेनौजसि जह्नुनेव विकार्मुकः कर्मसु सोच्यपूज्यः परिच्युतो दायइवोपचारः ॥
विचिच्छिदे मूलभृतां सलीलं सपत्रिभिर्दूरमहूरपातैः ॥५१॥ उपोढकल्याणफलोऽभिरक्षन्वीरव्रतं पुण्यपर

स्या ७

णाश्रमस्थः ॥ महोपवासैरिव संयतात्मा तैपसु निस्त्रैरिशुभिः शिवस्य ॥ ५२ ॥ ततोऽग्रभूमिं व्यवसायसिद्धैः सीमा
नमत्यैरतिदुस्तरैः सः ॥ तेजःश्रियामाश्रयमुत्तमासिं साक्षादहंकारमिवाललम्बे ॥ ५३ ॥ शरानवघ्नान्नवघ्नकमीव
चारविचित्रं प्रविचारमार्गैः ॥ हस्तेन निस्त्रिंशभृता [illegible]दीप्तः साकं भुजेनावारिधिरूर्मिणेव ॥ ५४ ॥ यथानिजं वर्त्म नि
भातिभाभिः छायामयस्या प्रभुसहस्ररश्मिः ॥ तथा भ्रम[illegible]मुनगस्थलीषु स्पष्टं हि मूर्तिर्ददृशे सभूतैः ॥ ५५ ॥ सु
श्लिष्टदेशादयवर्जितां गः शिवप्रणुन्नेन शिलीमुखेन ॥ ज्वलन्नसिस्तस्य पपात पाणावनस्पवन्नादिववे घुतोऽभि
॥ ५६ ॥ आक्षिप्तचापावरणोऽस्तुजालच्छिन्नोत्तमासिः समधैव भूतः ॥ रिक्तः प्रकाशश्च बभूव भूमेः स्फुत्साहितो घा
नइव प्रदेशः ॥ ५७ ॥ स खण्डनोद्भासयपरार्द्धमर्धवाभुजद्भिती योधिविजेतुमिच्छुः ॥ ससर्ज दृष्टिं परितः स्वपाद
पांजवेनमेवः पयसामिवाभ्रमेनो ॥ ५८ ॥ नीरंध्रेगमितवत्तिरूपं एषतैव भूतानामधिपतिना शिलाविताने

किरा०

७७

77

॥उच्छ्रायस्थगितनभोदिगंतरालं चिक्षेप क्षितिरुहजालमिंद्रसूनुः ॥५९॥ निःशेषं शकलितवल्कलांगसारैः
कुर्वद्भिर्भुवमभितः कषायचित्रां ईशानः सकुसुमपल्लवैर्नगेंद्रैराततेने बलिमिव रंगदेवताभ्यः ॥६०॥ उन्मू
लन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः गांडीवी कनकशिलानिभं भुजाभ्यामाजघ्ने वि
षमविलोचनस्य वक्षः ॥६१॥ अभिलषत उपायं विक्रमं कीर्तिलक्ष्मीरसुगममरिसैन्यैरंकमभ्यागतस्य
॥ जनक इव शिशुत्वे सुप्रियस्यैकसूनोरविनयमपि सेहे पांडवस्य स्मरारिः ॥६२॥ इति श्रीकिरातार्जुनीये
महाकाव्ये श्रीमद्भारविकृतौ लक्ष्मपदांके सप्तदशः सर्गः॥ ॥ततः उदग्र इव द्विरदे मुनौ रणमुपेयुषि भीमभुजायुधे
धनुरपास्य सबाणधि शंकरः प्रतिजघान घनैरिव मुष्टिभिः ॥१॥ हरपृथासुतयोर्ध्वनिरुत्पतन्नमृदुसंवलितांगुलि रामपाणिजः

गुलिपाणिजः ॥ स्फुटद्धन[illegible]ल्पशिलारवदारुणः प्रतिननाद दरीषु महीभृतः ॥२॥ शिवभुजाहतभि

७७

न्नपृथुकृतिःस्तुरखमिवानुवमन्वकपिध्वजः ॥ कइवनामहृहन्मनसांभवेदनुकृतेरपिसत्ववतांक्रमः ॥ ३ ॥ व्र
णमुखच्युतशोणितशीकरस्थगितशैलतटाभभुजांतरः ॥ अभिनवोषसरागभृताववभौजलधरेणसमानमु
मापतिः ॥ ४ ॥ उरसिशूलभृतःप्रहितामुहुःप्रतिहतिंययुरर्जुनमुष्टयः ॥ भृशरयाइवसह्यमहीभृतःपृथु
निरोधसिसिंधुमहोर्मयः ॥ ५ ॥ निपतितेधिशिरोधरमायतेसममरत्नियुगेयुगचक्षुषः ॥ त्रिचतुरेषुपदेषुकि
रीटिनालुलितदृष्टिमहाहिवचस्खले ॥ ६ ॥ अभिभवोत्थितमन्युविदीपितःसमभिसृत्यभृशंजववमोजस
॥ करयुगेनविभुज्यसमाददेशशिकलाभरणस्यभुजद्वयं ॥ ७ ॥ प्रववृतेथमहाहवमल्लयोरचलसंचल
नाहरणोरणः ॥ करणशृंखलसंकलनागुरुर्गुरुभुजायुधगर्वितयोस्तयोः ॥ ८ ॥ अयमसौभगवानुत
पांडवःस्थितमवाङ्मुनिनाशशिमौलिना ॥ समधिरूढमजेनतुजिष्णुनास्विदितिवेगवशान्मुमुहेगणैः

॥ ९ ॥ प्रव[ ]लिते चलितं स्थितमास्थिते विनमनेन नतं मुन्नतमुन्नतौ ॥ वृषकपिध्वजयोः सहि[ ]नामुहुरभा (ष्णु१)
विभयादिव भूभृता ॥ १० ॥ करणविभ्रमनिःसृतयोस्तयोः कृतभुजध्वनिवल्गुविवल्गतोः ॥ चरणपातनिपा
तितरोधसः प्रससृपुः सरितः परितः स्थलीं ॥ ११ ॥ वियति वेगपरिप्लुतमन्तरा समभिसृत्य रयेण कपिध्वजः ॥
चरणयोश्चरणानमितक्षितिर्निजगृहे तिसृणां जयिनं पुरं ॥ १२ ॥ विस्मितः सपदि तेन कर्म्मणा कर्म्मणां
क्षयकरः परः पुमान् ॥ क्षेप्तुकाममवनौ तमल्कमं निष्पिपेष परिरभ्य वक्षसा ॥ १३ ॥ तपसा तथा न मुदमस्य
ययौ भगवान्यथा विपुलसत्वतया ॥ गुणसंहतेः समतिरिक्तमहो निजमेव सत्वमुपकारि सतां ॥ १४ ॥
अथ हिमशुचिभस्मभूषितं शिरसि विराजितमिंदुलेखया ॥ स्ववपुरतिम[ ]नोहरं हरं दधतमुदीक्ष्य नना राम
मपाण्डवः ॥ १५ ॥ सहशरधि निजं तथा कार्मुकं वपुरतनु तथैव संवर्मितं ॥ निहितमपि तथै[ ] पश्यन्नसिं वृषभ
स१

बहुतरा२

ल१

गतिमुपाययोर्विस्मयं ॥ १६ ॥ सिषिचुरवनिमम्बुवाहाः शनैः सुरकुसुममिश्रमायाय चित्रं दिवः ॥ विम[illegible]रुचि
भृशं नभो दुन्दुभेर्ध्वनिरखिलमनाहतं स्पोनसे ॥ १७ ॥ आसेदुषां गोत्रभिदोनुवृत्त्या गोपायकानां भुवनत्रयस्य ॥ रो
चिष्णुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे ॥ १८ ॥ हंसांश्च हत्वा सुरसद्मवाहाः संज्ञाद्विकण्ठाभरणाः
पतन्तः ॥ चक्रुः प्रयत्नेन विकीर्यमाणैर्व्योम्नः परिष्वङ्गमिवाग्रपक्षैः ॥ १९ ॥ मुरितमधुलिहो वितानाकृतीः स्वजड
परिवितत्य सन्तानिकीः ॥ जलद इव निषिषिचुर्वासं हर्षे मरुदुपस्तुषयाम्बभूवे वसुरम् ॥ २० ॥ कृतवति परिवंदि
तेनोद्धके गणपतिभिरभिन्नतो मोङ्गमैः ॥ तपसि कृतफले फलज्यायसी स्तुतिरिति जगदे हरेः स्[illegible]नुना ॥ २१ ॥
॥ शरणं भवन्तमतिकारुणिकं भव भक्तिगम्यमधिगम्य जनाः ॥ जितमृत्यवो ऽजितभवन्ति भये ससुरासुरस्य जग
गतः शरणं ॥ २२ ॥ विपदेति तावदवसादकरी न च काम संपदभिकामयते ॥ नमन्ति चैकपुरुषं पुरुषास्तव

न १

किरा०
७९
79

यावदीशननतिः क्रियते ते ॥२३॥ संसेवंते दानशीला विमुक्त्यै संपश्यंतो जन्मदुःखं पुमांसः ॥ यन्निःसंगस्त्वं
फलस्यानतेभ्यस्तत्कारुण्यं केवलं न स्वकार्यं ॥२४॥ प्राप्यते यदिह दूरमगत्वा यत्फलत्यपरलोकगताय ॥
तीर्थमस्ति न भवार्णवबाह्यं सार्वकामिकमृते भवतस्तत् ॥२५॥ व्रजति शुचि पदं त्वयि प्रीतिमान् प्रतिहतमति
रेति घोरां गतिं ॥ इयमनघनिमित्तशक्तिः परा तव वरद न चित्रभेदः क्वचित् ॥२६॥ दक्षिणां प्रणतदक्षिणमूर्तिं
तत्त्वतः शिवकरीमविदित्वा ॥ रागिणापि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय ॥२७॥ दृष्ट्वा दृश्यान्या
चरणीयानि विधाय प्रेक्षाकारी याति पदं मुक्तमपायैः ॥ सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां यश्चोपास्ते सा
धु विधेयं स विधत्ते ॥२८॥ मुक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैरुपकारवंतः ॥ समुच्छिनत्सि त्वमचिं
त्यधामा कर्माण्युपेतस्य दुरुत्तराणि ॥२९॥ सन्निबद्धमपहर्तुमहार्यं भूरि दुर्गतिभयं भुवनानां ॥ अद्भुता

राम
७९

कृतिमयीमतिमायस्त्वंविभर्षिकरुणामयमायां ॥२०॥ नरागिचेतःपरमाविलासितावधूःसरीरेनतवास्ति

मन्मथः ॥ नमस्क्रियाचोषसिधातुरित्यहोनिसर्गदुर्बोधमिदंतवेहितं ॥२१॥ तवोत्तरीयंकरिचर्म्मसागजंज्व

लन्मणिःसारसनंमहानहिः ॥ स्रगास्यपंक्तिःशवभस्मचंदनंकलाहिमांशोश्चशमंचकासति ॥२२॥ अवि

ग्रहस्याप्यतुलेनहेतुनासमेतभिन्नद्वयमूर्त्तितिष्ठतः ॥ तवैवनान्यस्यजगत्सुविद्यतेविरुद्धवेषाभरणस्यकां

तता ॥२३॥ आत्मलाभपरिणामनिरोधैर्भूतसंघइवनत्वमुपेतः ॥ तेनसर्वभुवनातिगलोकेनोपमानमसि

नाप्युपमेयः ॥२४॥ त्वमेवतत्कःस्थावरजंगमानांत्वयाजगत्त्राणितिदेवविश्वं ॥ त्वंयोगिनांहेतुफलेरुणत्सि

त्वंकारणंकारणकारणानां ॥२५॥ रक्षोभिःसुरमनुजैर्दितेःसुतैर्वायल्लोकेष्वविकलमाप्तमाधिपत्यं ।

पावन्याःशरणगतार्त्तिहारिणोतन्माहात्म्यंभवभवतेनमस्क्रियायाः ॥२६॥ नरसाभुवनानियोविभर्त्ति ।

अविकल्पसंपृर्गा १


ध्वनतिब्रह्मपततःपरंपवित्रं ॥ परितोदुरितानियःस्तुनीते शिवतस्मैपवमात्मनेनमस्ते ॥३७॥ भवतःस्मरतांसदास
नेजयिनिब्रह्ममयेनिषेदुषां ॥ दहतेभवबीजसंहतिंशिखिनेनैकशिखायतेनमः ॥ आबाधामरणभयार्चिषा
चिरायप्लुष्टेभ्यःशिवमहतामवानलेन ॥ निर्वाणंसमुपगमेनयच्छतेतेजीवानांप्रभवनमोऽस्तुजीवनाय
॥३८॥ यःसर्वेषामावरीतावरीयासर्वैःशश्वन्नावृतोनादिनिष्ठः ॥ मार्गातीतायेंद्रियाणांनमस्तेविज्ञेयायव्यो
मरूपायतस्मै ॥३९॥ आणीयसेविष्णुविधायिनेनमोनमोंतिकस्थायनमोदवीयसे ॥ अतीत्यवाचांमनसां
चगोचरंस्थितायतेतत्पतयेनमोनमः ॥ ॥४०॥ असंविदानस्यममेशसंविदांतितिक्षितुंदुश्चरितंत्वमर्
हसि ॥ विरोध्यमोहात्पुनरभ्युपेयुषांगतिर्भवानेवदुरात्मनामपि ॥४१॥ आस्तिक्यशुद्धमवतःप्रियधर्म
धर्मंधर्मात्मजस्यविहितापदिशत्रुवर्गे ॥ संप्राप्नुयोविजयमीशययासमृध्यांतांभूतनाथविभुतांवित

तराहवेषु ॥४२॥ इतिनिगदितवंतंस्तूनुमुच्चैर्मघोनः प्रणतशिरसमीशःसादरंसांत्वयित्वा ॥ ज्वलदनलपरी
तंरौद्रमस्त्रंदधानंधनुरुपपदमस्मैवेदमभ्यादिदेश ॥४३॥ सपिंगाक्षःश्रीमान्भुवनमहनीयेनमहसातनुंभा
सांबिभ्रत्रिगुणपरिवारप्रहरणः ॥ परीत्येशानंत्रिस्तुतिभिरुपगीतःसुरगणैःसुतंपांडोर्धीरंजलधिमिव
नै२ भास्वानभिययौ ॥४४॥ अथशशधरमौलेरभ्यनुज्ञामवाप्यत्रिदशपतिपुरोगाःपूर्णकामायतस्मै ॥ अवित
तथफलमाशीर्वादरीपर्यंतोविजयिविविधमस्त्रंलोकपालांवितेरुः ॥४५॥ असंहार्यात्माहंजयिनमुद

मो१

यंप्राप्यतरसाक्षुरं गुर्वीवोढुंक्षितिमनवसाद्दायजगन्तः॥ स्वधाम्नालोकानांतमुपरिस्थितस्थानममरास्त
पोलक्ष्मीर्द्दीप्तंहिनिक्षुन्नमिचोद्वैरूपजगुः॥४६॥ व्रजजयपरिपुलोकंर्घादपप्रानमः सद्वगाहितइनिभवेनस्नाद्वि
तोद्दिवसंवृतैः निजगृहमथगत्वासादरंपांडुसुतोधृतगुरुजयलक्ष्मीधर्म्मसुतंननाम॥४८॥ ॥इतिश्रीपा
ठांतरं॥ ॥इतिश्रीकिरातार्जुनीयेमहाकाव्येश्रीमद्भारविकृतौलक्ष्मांकेधनंजयस्यास्त्रलाभोनाम
अष्टादशःसर्गः॥ ॥ ॥ ॥8॥8॥ 888888 ॥ ॥8888888॥ ॥ ॥88888॥॥॥

किरा०
८२


॥ ॥ संवत् १७२८ ॥ ॥ पूस्तकं ॥
लिखितं न हलाल ब्राह्मन इहं समी
छत पाल ॥ ॥ विश्वनाथाय नमः
॥ ॥ श्री कालभैरवाय नमः ॥ ॥

राम
८२

॥किरातपुस्तकं॥

१६००

पत्र२२